# नन्दनवनकल्पतरुः २२




उत्तरायणम्

वि.सं. २०६५

सङ्कलनम्

**कीर्तित्रयी**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नन्दनवनकल्पतरुः २२



शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

उत्तरायणम्
वि.सं. २०६५

सङ्कलनम्
**कीर्तित्रयी**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनवनकल्पतरुः ॥ द्वाविंशी शाखा ॥
(संस्कृतभाषामयं अयन-पत्रम् ॥)

सङ्कलनम् : **कीर्तित्रयी** ॥

प्रकाशनम् : **श्रीजैनग्रन्थप्रकाशनसमितिः**, खंभात ॥

वि.सं. २०६५, ई.सं. २००९

मूल्यम् : रू. १००/-

प्रातिस्थानम् : **श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर**
१२, भगतबाग, शेठ आणंदजी कल्याणजीनी पेढी समीप,
पालडी, अमदावाद - 380007 दूरभाष : 26622465

सम्पर्कसूत्रम् : "**विजयशीलचन्द्रसूरिः**"
C/o. Atul H. Kapadia
A-9, Jagruti Flats,
Behind Mahavir Tower,
Paldi, Ahmedabad-380007
दूरभाष : 26574981
M. 9979852135

मुद्रणम् : '**क्रिष्ना ग्राफिक्स**'
नारणपुरा गाम, अमदावाद ॥
दूरभाष : 079 - 27494393



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रास्ताविकम्

## तमसो मा ज्योतिर्गमय

मासत्रयात् पूर्वं मुम्बईनगर्यामातङ्ककारिण आक्रमणं कृतवन्तः । यदा कदाचिदेतादृशं किमपि घृणास्पदं कृत्यं देशे सर्वत्र भवत्येव । अनेन यः कोऽपि - यदि साधुरपि स्यात् कुपितः स्यादेव । बहुशतसङ्ख्याकानां निर्दोषाणां जनानां रक्तेन रञ्जिता जाता पृथ्वी । जनाक्रोशोऽपि तावान् प्रवृद्धो यद् युद्धमेवाऽत्रोपाय इत्यत्र सर्वेषा(राजनैतिकान् विहाय)मैकमत्यं जातम् । प्रतिक्रियैषा स्वाभाविक्येवाऽऽसीत् । किन्तु शनैः शनैः सर्वमपि शान्तं जातम् । किं कुर्युरत्र लोकाः ? वन्ध्याक्रोशेन को वा कस्य वा लाभः ? ये ह्यत्र प्रतिकर्तुं क्षमास्त एव यदि मौनावलम्बिनो वा निष्क्रिया वा यद्वा तद्वा विधानकारिणो वा केवलं तर्ह्यत्र प्रजाः कस्य पुरतः पूत्कुर्युः ?

अस्तु नाम ! नाऽनेन गगने घनघातेन किमपि प्रयोजनमस्माकं सेत्स्यति । वक्तव्यं त्वन्यदेवाऽत्र यदनेनाऽऽतङ्कवादेन सहैवाऽन्योऽपि कश्चिदातङ्कवादः सर्वत्र प्रवर्तते प्रसरति च । यश्चेतोऽपि भयावहो हानिकरश्च । न तत्र प्रत्यक्षं काऽपि व्यक्तिः परिदृश्यते । नाऽत्र कस्याऽपि प्राणघातो रक्तपातो वाऽपि जायते किन्तु यदपि यावदपि हानं तेन जायते तत्तु प्राणघाताद् रक्तपाताच्चाऽप्यधिकतमं व्यथाकरं भवति ।

एष आतङ्कवादः प्रवर्तते प्रसरति च विविधैः - दूरदर्शन-चलचित्र-विविधसामयिक-विज्ञापन -वृत्तपत्रादिभिर्माध्यमैः । एतेन हि सत्संस्कारौ-दार्य-विवेक-पारस्परिक-विश्वास-प्रेम-सहिष्णुता-मर्यादादीनां घातो भवति । नित्यमेव श्रूयते पठ्यते च यदद्याऽसावात्मघातं कृतवान्, असौ पितृन् हतवान्, असौ पुत्रं हतवान्, अनेनैतादृशी वञ्चना कृता, दुराचरणं कृतम् - इत्यादि । अद्य यत्र शिक्षणसंस्थायामपि निर्भयत्वं निःसंशयत्वं वा नाऽस्ति तत्राऽन्यस्थलानां तु का वार्ता ? किन्तु को नामाऽत्र लक्ष्यं प्रकुरुते ? संस्कारधनस्याऽस्य हानेन कस्य वाऽन्तःकरणं दूयते ? कस्य वाऽनेनाऽऽक्रोशः प्रज्वलति ? न कस्याऽपि । न कोऽप्येतादृशीं स्थितिमापद्रूपेण पश्यति विचारयति वा ।

अपराधस्त्वपराध एव । तदर्थं चाऽपराधिनो दण्डनीया एव । किन्तु केवलं दण्डेन नाऽपराधा न्यूना निर्मूला वा भवन्ति भविष्यन्ति च । अपराधवृत्त्या मूलमत्राऽन्वेषणीयम् । मूलान्वेषणं विनैवाऽपराधानामुन्मूलनप्रयासस्तु मूले घातं विनैव पुष्पपत्रादीनां घातेन वृक्षोच्छेदनप्रयास इव निष्फलोऽस्ति । शाखोच्छेदनं कृत्वा वृक्षस्य पतनं प्रतीक्ष्यतेऽस्माभिः । हास्यास्पदमेवाऽज्ञानमेतत् किल ! अज्ञानान्धकारे किमपि सत्यं न परिदृश्यते ।

अस्यैतादृशस्याऽऽतङ्कवादस्य निर्मूलनं प्रतिकरणं वा शक्यमेव, यदि वयं जागृताः स्याम ।

तमसो मा ज्योतिर्गमयेति प्रार्थनस्य सिद्धेरनन्तरमेव मृत्योर्माममृतं गमयेति प्रार्थनं सिद्ध्यति । अन्धकाराद् वयं मुक्ताः स्याम-एतदेवाऽस्माकं जीवनसाफल्यम् । अतो भवत्वस्माकं प्रथमं प्रार्थनं - तमसो मा ज्योतिर्गमय इति ।

वसन्तपञ्चमी, २०६५

धरमपुरम्

**कीर्तित्रयी**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

# "नन्दनवनकल्पतरुप्रशंसा"

देवराजरक्षिते
देवलोकनन्दने ।
भक्तवाञ्छितप्रदः
कल्पपादपो महान् ॥१॥

कल्पवृक्षभूषितं
नन्दनं दिवि स्थितम् ।
शब्दपुष्पसंयुतं
मर्त्यलोकमागतम् ॥२॥

धरातले नन्दनकाननस्थो
विद्वज्जनानन्दकरः स वृक्षः ।
षण्मासषण्मासविशेषकल्पो
जयत्यसौ जैनमतप्रशस्तः ॥३॥

जिनमतपरिपक्वः सुन्दरो लोकमान्यो
विविधबुधविचारैः पूरितः सर्वपूज्यः ।
फलभरनतशाखानम्रकल्पद्रुमोऽयं
भुवि जनमनवाञ्छापूरणेऽत्यन्तदक्षः ॥४॥

नन्दनवनकल्पतरुर्जगति
मानवमनमोदरतो जयति ।
सुन्दरवचनामृतबोधरत-
श्चन्द्रधवलकीर्त्यजरो भवतु ॥५॥



**विद्वान् महाबलेश्वरशास्त्री**
बेङ्गलूरुः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

कीर्तित्रय्या सङ्कलितं नन्दनवनकल्पतरोः शासनसम्राड्विशेषाङ्कं दृष्ट्वा मम मानसममोदिष्ट। आचार्यश्रीविजयोदयसूरिविरचितं श्रीविजयनेम्यभ्युदयमहाकाव्यमत्र सप्तमसर्गान्तं यावद् दत्तम्। अस्य काव्यस्यैतावदेवोपलब्धिरिति दुःखायते ममाऽन्तरङ्गम्। संस्कृतज्ञाः प्रकृतिरक्षणादिषु श्रेयः-कार्येष्वसक्ता इति मिथ्यावादं दूरीकरोति काव्यमिदम्। ततो दृष्टं श्रीप्रतापविजयविरचितं विजयनेमिसूरीश्वरगुर्वष्टकं यत्र पदे पदेऽर्थविशेषाः स्फुरन्ति। तत्र पद्यद्वयं गोमूत्रिकाबन्धे रचितमिति पुनर्विशेषः। नमामि नेमिनामानमित्यादि द्व्यक्षरं श्लोकं दृष्ट्वाऽस्मन्मनो भारविं स्मरति। विजयशीलचन्द्रसूरिरचितं गुरुस्तुत्यष्टकं च सश्रद्धं पठितम्। तत्कर्तृकं परमगुर्वष्टकं चाऽऽनन्दमजनयत्। अज्ञातकर्तृकं श्रीनेमिसूरीश्वरस्तुत्यष्टकं नितान्तं सन्तोषं सन्तन्तनीति। विश्वविख्यातः प्रा. अभिराजराजेन्द्रः 'सद्धर्मदं विजयनेमिमहं प्रणौमि' इति नाम कृत्वा रचितवान् अष्टौ पद्यानि। कविभालचन्द्रेण प्रशस्तिनाम्नाऽष्टविंशतिसंख्यानि पद्यानि दत्तानि। ततो हृद्यानि गद्यानि विद्योतन्ते। भज जिनराजम् इति गीतिर्मुनिकल्याणकीर्तिविजयरचिता ततो विराजते। आचार्यरामकिशोरमिश्रप्रणीतं सरस्वतीवन्दनं सरलसुभगपदावलीभूषितं च दृश्यते। पुनः परिपक्वं मुनिधर्मकीर्तिविजयसाहित्यं लभ्यते आस्वादनाय। जेरोमवीडमनस्य कथा मुनिरत्न-कीर्तिविजयपादानूदिता लोचनगोचरीभवति। अस्यां कथायां सङ्गीतविषये आसक्तिमदर्शयतः कथानायकस्य मनःपरिवर्तनं कथं जातमिति हृद्यया रीत्या वर्णितम्। मुनिकल्याण-कीर्तिविजयविरचिता स्तोककथात्रयी वाचकानां चेतांस्याकृषति। सरला भाषाऽस्याः कथात्रय्या भूषणम्। अभिराजराजेन्द्रमिश्रकृतस्तातपादपरिचयो मनोज्ञः। विद्याभ्यासाय साहायकं केन कदा कथं दास्यत इति वक्तुं न शक्यते। न कुलं, न जातिः, किन्तु मानवता मुख्येत्यत्र सम्यक् प्रतिपाद्यते। कण्ठाभूषणनाम्न्यां कथायां तु आचार्यरामकिशोरमिश्रो लोपामुद्रागस्त्ययोः संवादं प्रस्तुत्य धर्मरहस्यमुद्घाटितवान्। पाउअपाउडम् (प्राकृतप्राभृतम्) इति विभागो विदुषा भाषाप्रवीणेन अरैयर् श्रीरामशर्मणोपहृतः। अतीव रोचकोऽयं प्रबन्धो मम सहपाठिना (सतीर्थ्येन) श्रीरामशर्मणोपहृत इति महतः प्रमोदस्य स्थानम्। अहं त्वलसशिरोमणिः संस्कृतपठनमात्रेण श्रान्तः। स तु नानाभाषासु ग्रन्थान् रचयति। शतशः शिष्यानध्यापयतीति सन्तुष्यामि।

नन्दनवनकल्पतरोरयमङ्को नितरां वाचकानामानन्दं जनयतीति विवक्षामि। कीर्तित्रय्यै भूयिष्ठां नमउक्तिं समर्पयामि।

इति सुधीविधेयः

मैसूरुनगरम्

**एच्. वि. नागराजराव्**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वाचकानां प्रतिभावः

मान्याः,

सादरं प्रणतयः ।

'नन्दनवनकल्पतरोः' एकविंशतितमयनमधिगम्य प्रसीदामि । अत्र सर्वा रचना रम्या हृद्याश्च । आचार्यश्रीविजय-उदयसूरिप्रणीतं श्रीविजयनेम्यभ्युदय-महाकाव्यमपूर्णमपि नितरां मार्मिकम् । अस्मिन् काव्ये प्रणेतुः पाण्डित्यं पदे पदे विराजतेतराम् । मधुपुरीवर्णनं कस्य चित्तं न चमत्करोति ?

'सौभाग्यलक्ष्मीमवलोक्य यस्याः,
किं नाऽलका स्वां विजितामवैति ।
भोगावती सा तत एव नूनं
पातालवासं वरमभ्युपैति ॥' (श्रीविजय. १/४४)

प्रा. अभिराजराजेन्द्रमिश्रस्य 'स आसीन् मम तातपादः' इति कथा सर्वथा हृदयं संस्पृशति, तस्य च संवेदनशीलतां सहानुभूतिं दीनानुकम्पां च सम्यगभिव्यनक्ति । किन्तु, मम मतौ, कथेयं काल्पनिकीव विद्यते । यस्य तात-पादोऽभिभावको वा प्रयागविश्वविद्यालयस्य प्रतिष्ठितः प्राध्यापक आसीत् तदध्ययनकाले सः कथमनाथ इवाऽभूत् ? किमपि भवतु । कथेयं सर्वथा मार्मिकी प्रशंसनीयतरा च ।

संस्कृतभाषायाः साहित्यस्य च संरक्षणे संवर्धने च 'नन्दनवनकल्पतरोः' प्रयासाः सर्वथाऽभिनद्यसत्त्वाः सन्ति । अत्र श्रीमुनिधर्मकीर्तिविजयस्य पत्रं नितरां प्रेरणाप्रदमस्ति । जयतु संस्कृतं संस्कृतिश्च ।

**डा. रूपनारायणपाण्डेयः**
प्रयागः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभावः

समादरणीयाः कीर्तित्रयीति प्रथिताः मुनिवराः

सादरं प्रणतयः । मासद्वयात् पूर्वमेव भवद्भिः प्रीत्या प्रेषिते सञ्चिके प्राप्ते । 'शासनसम्राड्-विशेषः-१' सञ्चिकायां दत्ता श्रीविजयनेमिसूरीश्वराणां जीवनगाथा सुगमा सुरम्या च । अर्थानुरूपाणि भावविस्फुरणक्षमाणि च वर्णरञ्जितचित्राणि चेतः आह्लादयन्ति । अविदुषां सौकर्याय १७२ पृष्ठे सन्धिविवरणं, तदग्रिमपुटे च शब्दार्थौ इति यद् दत्तं तद् नूनं सम्पादकानां सहृदयतां स्फुटयति; श्लाघ्यः अनुकरणीयश्चाऽयं क्रमः । तदर्थमभिनन्दनानि । मसृणं कागदं, प्रस्फुटं मुद्रणम्, सुभद्रं बन्धनम् इति सर्वमपि उत्तमं वर्तते । ग्रन्थसमीक्षा वाचकानां महते लाभाय । 'वेषस्य संस्कृतेश्च कः सम्बन्धः ?' इति नागराजवर्यस्य लेखोः हृदयङ्गमः । हृद्भावतन्तुतोदकोऽयं प्रसङ्गः अस्मान् आत्मपरीक्षणार्थं प्रेरयति । 'मर्म-नर्म' विभागोऽपि नूनं ददाति शर्म । रेखाचित्राणि मनोज्ञानि । विशेषाङ्कस्य द्वितीयसम्पुटोऽपि सङ्ग्रहयोग्यं सङ्कलनम् । मुनिकल्याण-कीर्तिविजयवर्येण लिखिताः तिस्रः कथा उद्बोधिकाः । अन्येऽपि लेखा मौल्यपूर्णाः । तत्र तत्र रिक्तस्थलेषु दत्ताः श्लोका मानसं समुल्लासयन्ति । प्रत्येकस्मादपि पुटाद् यथा श्रद्धालवो वाचका अमूल्यान् धर्म-नीति-संस्कृति-संस्कृत-अध्यात्मविषयान् शिक्षेरन् तथाऽवहितमस्ति सम्पादकैः । एते प्रेषितवद्भ्यः भवद्भ्यो हार्दं कृतज्ञताः ।

**- ब्र. सोमशेखरः**

बेलूडुमठः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| महावीरवाणी | | १ |
| अष्टप्रातिहार्योल्लसितश्रीवीतरागस्तुतिः | मुनिकल्याणकीर्तिविजयः | ३ |
| श्रीपार्श्वनाथस्तुत्यष्टकम् | अज्ञातनामा विद्वान् | ५ |
| क्षुद्रता-कुलकम् ॥ | विजयशीलचन्द्रसूरिः | ७ |
| बालगीतम् | | |
| शब्दधातुरूपाण्यवगच्छ । | डॉ. आचार्यरामकिशोरमिश्रः | ९ |
| श्रीकर्पटहेटक(कापरडा)तीर्थस्थापनं | | |
| तज्जीर्णोद्धारश्च | अज्ञातनामा विद्वान् | १० |




| | | |
|---|---|---|
| चिन्तनधारा | मुनिरत्नकीर्तिविजयः | १६ |
| समाधिमृत्युः | मुनिधर्मकीर्तिविजयः | १९ |
| संवेदनशीलता पशु-पक्षिणाम् | मुनिकल्याणकीर्तिविजयः | २५ |
| वैदिककवयित्री विश्ववारा | डॉ. आचार्यरामकिशोरमिश्रः | २९ |




| | | |
|---|---|---|
| | मुनिधर्मकीर्तिविजयः | ३१ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः

| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|

**ललितकथा**


| | | |
|---|---|---|
| चाटुचर्याचमत्कारा: | देवर्षिकलानाथशास्त्री | ३६ |


**काव्यानुवादः**


| | | |
|---|---|---|
| कलिङ्गो विजितोऽपि मानवता हता | मुनिधर्मकीर्तिविजयः | ५० |
| आमन्त्रणम् | मुनिकल्याणकीर्तिविजयः | ५१ |


**अनुवादः**


| | | |
|---|---|---|
| सत्साधु(संत)-निर्णयः | मुनिकल्याणकीर्तिविजयः | ५३ |


**कथा**


| | | |
|---|---|---|
| कलिकालस्य भरतः (सत्यघटना) | मुनिरत्नकीर्तिविजयः | ५९ |
| जागृतिः | मुनिरत्नकीर्तिविजयः | ६३ |
| आत्मजागृतिर्जयतु | मुनिधर्मकीर्तिविजयः | ६४ |
| वाचश्चमत्कृतिः | मुनिधर्मकीर्तिविजयः | ६५ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| अयं तु मूर्खोऽप्यस्ति | मुनिकल्याणकीर्तिविजयः | ६६ |
| कथात्रयी | सा. ऋजुमतिश्रीः | ६७ |
| झांसीराज्ञी लक्ष्मीबाई | राजेशकुमार मिश्रः | ७१ |
| **नर्म-नर्म** | कीर्तित्रयी | ७२ |
| **प्राकृत-विभागः** | | |
| चारुसुहासियाइं | विजयशीलचन्द्रसूरिः | ७५ |
| पाइयविन्नाणकहा | आचार्यविजयकस्तूरसूरिः | ८९ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org



# महावीरवाणी

(श्रीदशवैकालिकसूत्रात् सङ्कलिता)

धम्मो मंगलमुक्किट्ठं ।।१-१।।
(सं. छाया) [धर्मो मङ्गलमुत्कृष्टम्]

साहीणे चयइ भोए से हु चाइ त्ति वुच्चइ ।।२-३।।
[(यः) स्वाधीनान् त्यजति भोगान् स खलु त्यागीत्युच्यते ।]

छिंदाहि दोसं विणएज्ज रागं, एवं सुही होहिसि संपराए ।।२-५।।
[छिन्द्धि द्वेषं विनयेः रागम्, एवं सुखी भविष्यसि संसारे ।]

वंतं इच्छसि आवेउं सेयं ते मरणं भवे ।।२-७।।
[वान्तमिच्छसि आपातुं श्रेयस्तव मरणं भवेत् ।]
(वान्तान् भोगान् पुनः स्वीकर्तुमिच्छति यः तस्य कृते मरणमेव श्रेयस्करम् ।)

सव्वभूयप्पभूयस्स सम्मं भूयाइ पासओ ।
पिहियासवस्स दंतस्स पावं कम्मं न बंधई ।।४-९।।
[सर्वभूतात्मभूतस्य सम्यग् भूतानि पश्यतः ।
पिहिताश्रवस्य दान्तस्य पापं कर्म्म न बध्यते ।।]

पढमं नाणं तओ दया ।।४-१०।।
[प्रथमं ज्ञानं ततो दया ।]

जं छेयं तं समायरे ।।४-११।।
[यत् श्रेयस्तत् समाचरेत् ।]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संकिलेसकरं ठाणं दूरओ परिज्जए ।।५-१-१६।।
[सङ्क्लेशकरं स्थानं दूरतः परिवर्जयेत् ।]

काले कालं समायरे ।।५-२-४।।
[काले कालं समाचरेत् ।]
(योग्यकाले कालोचितं समाचरेत् ।)

अलाभो त्ति न सोएज्जा, तवो त्ति अहियासए ।।५-२-६।।
[अलाभ इति न शोचेत्, तप इति (कृत्वा) अधिसहेत ।]

जे न वंदे न से कुप्पे, वंदिओ न समुक्कसे ।।५-२-३०।।
[यो न वन्दते न तस्मै कुप्येत्, वन्दितो न समुत्कृषेत् ।]

मायामोसं विवज्जए ।।५-२-४९।।
[मायामृषावादं विवर्जयेत् ।]

सव्वे जीवा वि इच्छंति, जीविउं न मरिज्जिउं ।
तम्हा पाणवहं घोरं निग्गंथा वज्जयंति णं ।।६-१०।।
[सर्व्वे जीवा अपि इच्छन्ति जीवितुं न मर्तुम् ।
ततः प्राणिवधं घोरं निर्ग्रन्था वर्जयन्ति ।।]

मुच्छा परिग्गहो वुत्तो ।।६-२०।।
[मूर्च्छा परिग्रह उक्तः ।]

कुसीलवड्ढणं ठाणं दूरओ परिवज्जए ।।६-५८।।
[कुशीलवर्धनं स्थानं दूरतः परिवर्जयेत् ।]



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# अष्टप्रातिहार्योल्लसित-श्रीवीतरागस्तुतिः

- मुनिकल्याणकीर्तिविजयः

गायन्निवाऽलिविरुतैः प्रचलद्भिः पत्रै-
र्नृत्यन्निवाऽपि मुदितो ननु **चैत्यवृक्षः** ।
रक्तोऽपि यस्य गुणरागितयेव भाति
तं वीतराग-वृजिनं जिनपं नमामि ॥१॥

**आ-योजनं सुमनसो** विपरीतवृन्ताः
यत्पुण्यतः क्लमकणं न समाप्नुवानाः ।
यद्देशनाभुवि सदा विकिरन्ति देवाः
तं वीतकल्मषचयं मुनिपं स्मरामि ॥२॥

**यद्दिव्यवाच**मिह मालवकैशिकीति-
सद्ग्राम-रागकलितां सुपवित्रीभूताम् ।
हृष्टा मृगाः श्रवणतो नु पिबन्ति मुग्धा
तं वीतरोषधिषणं शमिनं नमामि ॥३॥

यत्पार्श्वयोर्विधुमयूखसिता चकास्ति
**सच्चामरावलि**रतीव सुवर्णरम्या ।
हंसालिरेव नु मुखाम्बुजसेवनाय
तं वीतमोहमनघं हृदये दधामि ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिंहासनं** समधिरुह्य हि भव्यजीवान्
सद्देशनां दिशति केसरिणीव यस्मिन् ।
संसेवनाय नु मृगा अभियान्ति श्रोतुं
तं वीतकर्मकलुषं जिनमानमामि ॥५॥

**भासां चयैः परिवृतो** ननु चन्द्रमाः किं
सम्यग्दृशां प्रमददो नु चकोरकाणाम् ।
एवं वितर्कणमिह प्रविलोक्य यं स्यात्
तं वीतजन्ममरणं शरणं श्रयामि ॥६॥

साम्राज्यमत्र जगति निखिलाप्तपुंषु
प्राज्यं तवेति दिवि घोषणमादधानः ।
यस्मिन् क्षितौ विहरतीह नु **दुन्दुभिः** किं
तं वीतभीतिनिकुरम्बमिनं नमामि ॥७॥

पुण्यर्द्धिकस्य भुवने किमुतोर्ध्वमूर्ध्वं
प्रौढप्रभावप्रसरप्रथयित्री मूर्ध्नि ।
**छत्रत्रयी** क्रमवती कलितेव यस्य
तं वीतपापपटलं हृदि धारयामि ॥८॥

एवं चमत्कृतिकरीं खलु प्रातिहार्य-
लक्ष्मीं विलोक्य वितथाभिनिवेशिनोऽपि ।
चित्रीयिता विततनेत्रपुटा हि यस्य
तं वीतदोषविसरं विभुमाश्रयामि ॥९॥

**[कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितस्य वीतरागस्तवस्य पञ्चमं प्रकाशमनुसृत्य कृतैषा वीतरागस्तुतिः ॥]**



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# श्रीपार्श्वनाथस्तुत्यष्टकम्

अज्ञातनामा विद्वान्

(शिखरिणी च्छन्दः)

महाराजव्राजप्रणतिरतिलोलाङ्कितशिरो-
मणिव्रातच्छायाञ्चितचरणपङ्केरुहयुगः ।
महामोहध्वान्तप्रशमनपटिष्ठः सुकृतिना-
**मसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥१॥

कृपापारावारः प्रणतजनदुःखौघगहन-
प्रणाशे दावाग्निः श्रुतिपथगतः शुद्धचरितः ।
नमल्लोकस्यान्ते तनितसुखसङ्घः प्रभुवरो
**ह्यसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥२॥

पितुः सेनादश्वादलभत जनुर्भूपतिलका-
दवामाद् वामाया भुवनजयिनो गर्भकुहरात् ।
नमस्यायां कस्यां सकलजननेत्रोत्सवकरः
**सदा पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥३॥

विधेः काठिन्येन प्रबलतररेखाजनितया
विपद्वल्ल्या शश्वत् परिभवशतैर्बाधितवताम् ।
जनानामुद्धर्तुं य इह शरणो भक्तिभजता-
**मसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपारे संसारे विषयभुजगाक्रान्तमनसा
मया भ्रामं भ्रामं स्थगितमिव ते पादयुगले ।
प्रपन्नोऽस्मि ब्रह्मन् ! वितर शरणं शान्तमनसा-
**मसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥५॥

जगन्मातुर्मातुर्यदवधि वसन् गर्भकुहरे
भवान् सर्पो भूत्वा नयनविषयो जात इति यत् ।
ततः **पार्श्वे**त्याख्यां भजसि यदहो तातकलिता-
**मसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥६॥

जने श्रावं श्रावं जिनविषयकोलाहलमसौ
जनुर्लब्ध्वा लोके सकलजनतायामसुलभैः ।
यथावद् व्याख्यानैः पुनरपि समृद्धिं समनय-
**न्नसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥७॥

जनानां स्तोतॄणां वितरति यथेष्टं शुभफलं
न तेषां स्वर्लोकेऽप्यसुलभगतिर्या(र्जा)तु भवति ।
न वा मोक्षस्तेषां भवति दुरवापो विनमता-
**मसौ पार्श्वस्वामी दिशतु विमलां मोक्षपदवीम्** ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# क्षुद्रता-कुलकम् ॥

- विजयशीलचन्द्रसूरिः

शास्त्रेषु क्षुद्रता दोषः, संसारे सा गुणोऽधुना ।
कानिचित् तत्स्वरूपाणि, वर्ण्यन्तेऽत्र मया बुध ! ॥१॥
औद्धत्यं क्षुद्रतारूपं, कौतूहलमथाऽपरम् ।
चाञ्चल्यमथ चौत्सुक्यं क्षुद्रतैव, विदाङ्कुरु ॥२॥
प्रतिक्रिया क्षुद्रताया रुपमस्ति सखे ! तथा ।
उपहासोऽपि तद्रूप-मात्मश्लाघाऽपि सैव भोः ! ॥३॥
अहङ्कारः क्षुद्रताया रुपमस्ति भयानकम् ।
तिरस्कारोऽपि तद्रूप-मित्यवेहि सखे ! खलु ॥४॥
असूया कथ्यते सा यद्, गुणानां दोषवादिता ।
क्षुद्रता साऽस्ति, दोषाणां पक्षपातोऽपि क्षुद्रता ॥५॥
निन्दा परेषां क्षुद्रत्वं, परतप्तिरपीह तत् ।
ईर्ष्या द्वेषश्च शठता, तस्या रुपाणि त्रीण्यपि ॥६॥
भयं भयङ्करं रूपं, क्षुद्रताया अवेहि रे ! ।
जुगुप्सा चाऽपि तद्रूपं निकृष्टं च घृणास्पदम् ॥७॥
घृणा निष्ठुरता क्रौर्यं दैन्यं लोलुपता तथा ।
लघुता-गुरुताख्ये द्वे ग्रन्थी, क्षुद्रत्वभाक् समम् ॥८॥
आशुतोषित्व-रोषित्वे रूपे द्वे क्षुद्रतावतः ।
असभ्यभाषा दम्भश्च स्वरूपमपि तस्य भोः ! ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

असहिष्णुता च स्वार्थित्वं, क्षुद्रतैवाऽस्त्यहो ! किल ।
अशक्यकार्यारम्भित्वं तद्रूपं हास्यकारकम् ॥१०॥
तथा महत्त्वस्याऽऽकाङ्क्षा, परपीडनमेव च ।
कलिः केलिप्रियत्वं च द्रोहः, सर्वं नु क्षुद्रता ॥११॥
कलङ्कदानं द्वेषेण परमर्मप्रकाशनम् ।
आपत्काले च मित्राणां परित्यागोऽपि क्षुद्रता ॥१२॥
किं बहूक्तेन ? संक्षेपात् कथ्यते यदि वस्तुतः ।
सर्वेषामपि दोषाणां क्षुद्रता मूलमस्ति भोः ! ॥१३॥
क्षुद्रता यत्र तत्र स्याच्चापल्यं हठवादिता ।
अगाम्भीर्यं बालिशता स्वैराचारित्वमप्यहो ! ॥१४॥
शास्त्रेषु कथितं चैवं क्षुद्रताविषये किल ।
भवाभिनन्दिनामाद्यं लक्षणं क्षुद्रता ननु ॥१५॥
यो भवभ्रमणेनैव मोदते नितरामसौ ।
भवाभिनन्दी स्यान्मोक्ष-द्वेषी चाऽपीति विश्रुतम् ॥१६॥
मोक्षं च मोक्षमार्गं च मन्यते बहु यो जनः ।
संसारद्वेष्यसौ धीमान् मोक्षानन्दीति गीयते ॥१७॥
क्षुद्राणां क्षुद्रतायाश्च साम्राज्यमधुना परम् ।
व्याप्तं सर्वत्र भुवने गुणहारि भयङ्करम् ॥१८॥
रक्षणीयो निजात्माऽत्र गुणापेक्षिजनैर्बत ! ।
स्वल्पं च यद् गुणधनं रक्ष्यमेव प्रयत्नतः ॥१९॥
अक्षुद्रो भव भो आत्मन् ! यदीच्छस्यात्मनो हितम् ।
गाम्भीर्यौदार्यधैर्यादि-गुणस्थैर्यं कुरुष्व च ॥२०॥
भवभ्रान्तेरसि श्रान्तो-ऽपेक्षसे मोक्षमेव चेत् ।
तदा क्षुद्रत्वदोषाय देहि शीघ्रं जलाञ्जलिम् ॥२१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# बालगीतम्
# शब्दधातुरूपाण्यवगच्छ

डॉ. आचार्यरामकिशोरमिश्रः

बालक एको द्वौ च दानवौ राक्षसाश्च बहुवचने सन्ति ।
विष्णुं शिवौ ब्रह्मणो हस्तान् भक्ता भक्त्या विलोकयन्ति ।
गुप्त्या खड्गाभ्यां च सायकैः शत्रुभ्यः स्वात्मानं रक्ष ।
पुत्र ! शब्दरूपाण्यवगच्छ ॥१॥

स्वस्रे मातृभ्यां च पितृभ्यः शब्दान् ज्ञातुं वचनं देहि ।
खलाच्च चौराभ्यां दुष्टेभ्यः स्वं त्रातुं मे समीपमेहि ।
बुधस्य जनयोर्लोकानां च ज्ञाने फलयोः कर्मसु गच्छ ।
पुत्र ! शब्दरूपाण्यवगच्छ ॥२॥

इत्थं सप्तविभक्तिषु ज्ञात्वा शब्दस्वरूपं लोके व्यवहर ।
बालक ! पितरौ ! मानवाः ! अहो ! सम्बोधनरूपाणि त्वं स्मर ।
अधुना धातुरूपज्ञानार्थं कक्षे कविं स्वपितरं गच्छ ।
पुत्र ! धातुरूपाण्यवगच्छ ॥३॥

एहि पुत्र ! आसन्द्यामुपविश, धातोर्दश हि लकाराः सन्ति ।
पठति पठतः पठन्ति लटि भोरन्यपुरुषरूपाणि भवन्ति ।
किं पश्यसि मां ? युवां न पठथः, पुस्तकैश्च सह यूयं गच्छथ ।
सुत ! मध्यमरूपाण्यवगच्छ ॥४॥



अध्यापयामि त्वामावां पुनरिदं लिखावस्ततः पठामः ।
इत्युत्तमपुरुषस्य क्रियायां रूपं ज्ञात्वा हृदि च धरामः ।
मत्तः शिक्षकाच्च त्वं सर्वं व्याकरणं साहित्यमधीष्व ।
पुत्र ! धातुरूपं जानीष्व ॥५॥

---

२९५/१४, पट्टीरामपुरम्,
खेकड़ा (बागपत) उ.प्र. २५०१०१



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्रीकर्पटहेटक(कापरडा)तीर्थस्थापनं तज्जीर्णोद्धारश्च

**– अज्ञातनामा विद्वान्**

**यामाश्रित्य परब्रह्म संसारे सम्प्रवर्तते ।**
**तां शब्दरूपां सर्वेषामाप्तां शक्तिं नमाम्यहम् ॥**

अस्ति खलु समस्तजनताजनजेगीयमानामरलोकलोचनचकोरी-पेपीयमानयशश्चन्द्रचन्द्रिकाधवलीकृतदिगन्त-दिगन्तरागतानेकजनसम्मर्दसमर्दित-विमलशीतलसुगन्धितरम्यमार्ग-मार्गगतानेकसुधाधवलितप्रासादप्रसारप्रहसित-गिरीशगिरिप्रकाशसततमङ्गलगीतध्वनिध्वनितगव्यूतिरनेकविधभोगसम्भोग-भावितभोगिजनमण्डिता **कर्पटहेटक(कापरडा)** नाम नगरी ।

तस्यामनेकानेकनमल्लोकमौलिमालामणिप्रभापिञ्जरितचरणनखमयूखः कोऽपि निजजगत्पावनपुण्यचरितप्रभावभयचकितपिहितद्वारामरावतीविहरणलालसा-लालायितमानस-मानसवासविरतिप्रकाशपर्याप्तकलरवाहूतामराङ्गनाभिनन्दित-नन्दनवनभोगभावनाभावितमानसराजहंस-राजहंसकृतावासानेकतरुणगणिका-गणसङ्गीतस्वादुचपलचित्तामरेन्द्रजनितभीतिरसारसंसारविरतचित्तो यती ।

स चाऽनुक्षणं क्षणप्रभेव चञ्चलताचञ्चलितजीवनजातं मन्यमानोऽनारत-जैनागमाभ्यासविमलीकृतस्वान्तः स्वान्ते सावधानतया जिनेश्वरमेवाऽऽराधयन् प्रतिवसति स्म ।

तमेकदा राजद्राजन्यशिरःशेखरीभूतामूल्यरत्न-रत्नजालच्छायासञ्जात-प्रकाशप्रभव-प्रसरितविमलचन्द्रप्रभापटल-चरणनखमण्डलयोधपुरावनीमहेन्द्र-संस्थापितो **जयतारण**प्रान्तीयाध्यक्षकर्मणि कर्मकुशलतासमाराधितराजचित्तप्रसादो निजसद्गुणावधीरितसकलराजपुरुषो **भण्डारी-भाणाजी**त्याख्याप्रख्यातभुवनः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केनाऽपि निजदौर्जन्यजनितजगत्पीडाव्यापारव्यापृतचित्तेन सहजमित्रपदवीमसहमानेन राजसंसदि तदीयालीकदोषशताविष्करणेन जनितराजमनःक्षोभेणाऽधिक्षिप्तः 'सत्वरं मदन्तिकमानये'ति राजाज्ञया विसर्जितदूतस्तमुद्देशमेव जिगमिषुर्बुभुक्षुश्च सपरिवारोऽतिप्रसन्नतया सर्वविधारामपुष्करिण्याद्यनेकभोगभोग्यवस्तु सनाथां तामेव नगरीमासाद्य समुपविवेश ।

अनन्तरं कृतस्नानादिनिजनित्यनियमकृत्यान् परिजनान् 'भवद्भिर्भोक्तव्यं, मया तु नैव भुज्यत' इति समादिदेश । अथाऽनेकानुरोधाराधितचितैः पुनः पुनः पृच्छातत्परैर्निजाहारव्यापारवञ्चितैरतिविमनस्कैः परिजनैः पृष्टो 'जैनोऽहमन्तरेण त्रिजगत्पावनचरितं जैनप्रतिबिम्बदर्शनं न भोक्ष्य' इति विज्ञापितवान् । आकलय्य च तदीयहृद्गताभिप्रायमितस्ततस्तदन्वेषणतत्पराः परिजनाः कस्मादपि विज्ञाय यतिवरनिकेतनस्थजैनप्रतिबिम्बं सत्वरं ससम्भ्रममुपेत्य व्यजिज्ञपन् । 'देव ! अत्रैव ग्रामे कस्याऽपि यतिन उपाश्रयेऽस्ति श्रीजिनप्रतिबिम्ब'मिति परिजनेभ्यः संश्रुत्य जाततत्कालहर्षप्रकर्षो बहुतरप्रशंसितनिजभागधेयस्तमुद्देशमाजगाम । आगत्य च कृतदेवदर्शनस्तं प्रणम्य देवप्रतिमप्रभापटलसन्द्योतितदिगन्तरालमतिप्रभावं यतिमाससाद ।

आसाद्य च निजनमन्मौलिना दूरत एव प्रणम्य भक्तिप्रह्वतया नाऽतिदूरे समुपविवेश । आसीनं च तं 'कोऽपि पुरुषविशेषोऽय'मिति मन्वानो जिज्ञासुश्च तदीयमुदन्तजातं, 'भद्र ! कुशलं ते ? काऽपि चिन्तापिशाचिनीगृहीतचित्तवृत्तितया वैलक्ष्य इव लक्ष्यते(से) । तद्यदि न चेद् गोप्यमिच्छामि श्रोतुं शोकहेतु'मिति पृष्टः । 'किमस्ति सर्वेषां हृदयान्तरज्ञानवतां श्रीमतामपि गोप्य'मिति सर्वमेव निजवृत्तान्तं विन्यवेदयत् । श्रुत्वा च तदीयमुदन्तजातं, 'भद्र ! न खल्वस्ति सत्यव्रतानां भयम् । सहनशीलता हि बलवतामप्यापदां पारं नयति ।' तथा च- 'धर्मो महामङ्गलमङ्गभाजाम् । धर्मो रक्षति धार्मिक'मित्यादि बहुतरोपदेशवचनानि कथयित्वा भूयो भूयः समाश्वासितवान् ।

आस्वाद्य च सुधासध्रीञ्चं(सध्र्यक्) तदीयवचनं प्रणम्य च पुनः पुनः समागत्य निजावासे कृतभोजनस्तत्क्षणमेव प्रतस्थे ।

अथाऽपरेद्युः प्रभात एव कृतनित्यक्रियः समाराध्य जनदुःखहरणक्षमं जिनदेवं यतिवरवचनं मनसि सन्ध्याय **मानोराज**भवनाभिमुखं प्रतिष्ठितवान् । क्षणेन चाऽनतिदूरतया अनेकदेशान्तरागतराजजनमत्तमातङ्गमदस्रावा(व)वासाहूत-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोलम्बकदम्बझङ्कारवबधिरीकृतदिगन्तमण्डलं हयहेषाघोषप्रतिध्वनितराजसदनं सततबन्दिजनोदितजयशब्दतुलितामरेन्द्रसौभाग्यमास्थानमण्डपमाससाद ।

आसाद्य च रत्नप्रभापटलालक्षितानेकविग्रह-विग्रह[वदिवाऽराति]जन-जनितत्रासानेक-नरपतिशिरश्चूडामणिरञ्जितपदनख-पशुपतिपराजयजनित-भयोरु(र)री-कृतमानवदेहमकरध्वजदेह-देहप्रभाप्रभावपिहितामरेन्द्रकथ-कथावशेषितनल-कर्णादिभूपतिलक-भूपतिलकसर्वगुणगरिमागरिष्ठबलिष्ठश्रेष्ठ-श्रेष्ठविद्याविद्यासम्भार-भासुरशेमुषीवैमुखीकृतसुरगुरुगरिमगुरुतरशासनशासित-भुवनवलय-भुवनवलयावलग्नयशःप्रचारप्रतिष्ठापितभुवनत्रयलोकपवित्रकीर्ति राजानमवलोकितवान् ।

गत्वा च तदीयपादपद्मसविधे सविनयनतकन्धरः क्षितितलमिलितशिरः प्रणनाम । अनन्तरमुपविष्टे च तस्मिन् सबहुमानं पृष्टे च राज्ञा सर्वमेव याथातथ्येनाऽऽख्यत् । संश्रुत्य च तदीयवचनजातं निर्दोषतां तस्याऽवगम्य जातद्विगुणतरविश्रम्भो राजा सादरमवोचत्- 'अयि भवद्भिरद्याऽऽरभ्य निपुण-निरीक्षणचमत्कृतराजपुरुषैस्तथा राज्यकार्यं सम्पादनीयं यथाऽयमिदानीं जात मा(आ)नन्दो मम चेतसो निरवसानेन भूयेत' इति समादिश्य मन्त्रियोग्यसत्कारेण सत्कृत्य विसर्जितवान् ।

समुपजाततत्कालहर्षप्रकर्षो भाण्डारी स्वपुरं जिगमिषुस्तदध्वनि तमेव जिनप्रतिबिम्बं दिदृक्षुर्यतिवरस्योपाश्रयमाजगाम । अनन्तरं कृतयथाविधिदेव-नमस्कृतिर्यतिवरं च प्रणम्य सर्वमेव तत्रत्यमुदन्तजातं विज्ञापितवान् । आकर्ण्य चाऽमन्दानन्दपूरपूरितो यतिवरस्तं तदीयधर्मस्थितिं च भूयो भूयः प्रशशंस ।

अथ विनीतो भाण्डारी सविनयमवोचत्- 'महात्मन् ! यद्यप्ययं जनः सकलसंसारबन्धनबद्धहृदयो न किमपि सदनुष्ठानं कुरुते तथाऽपीदानीन्तन-भवदीयदर्शनसञ्जातपुण्यप्रभावपिहितकलुषः किमपि मदीययोग्यतायोग्य-कर्तव्यमुपदिश्य चिरायाऽनुग्राह्योऽय'मिति ।

सकलजनान्तःकरणवेदिना तेन समुपलभ्य तदीयहृद्गताभिप्रायमभाणि-'सेवक! भवतां धर्माचरणतत्परचित्तानां तदुपदेशो नाम दिवा दीपेन दिनकरदर्शनमेव । तथाऽपि, अत्रत्यजिनप्रतिबिम्बस्य प्रतिष्ठापनयोग्यमेकं मन्दिरं विधेयमस्ति । तत्र भवद्भिर्यतमानैर्भवितव्य'मिति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाकर्ण्य च तद्वचनं, 'सत्यं(त्यो) भवतु श्रीचरणानामयमादेश' इति निगद्य, 'महाराज ! भीतभीत इव लज्जया परीत एष जन इदानीं शरशत(५००)-परिमितमेव द्रव्यं दित्सति, तत्र करुणावरुणालयेन श्रीमता क्षान्तेन भवितव्य'मिति निवेदयन् तूष्णीम्बभूव ।

यतिरपि तदीयसत्यं निर्व्याजं च वचनमाकर्ण्य प्रसन्नतया तमेव द्रव्यमेकस्मिन् भाजने निःक्षिप्या'ऽप्रतिबन्धव्यापारेण तत्रत्यशिल्पकर्म कुर्वतां जनानामसङ्ख्यातमेव द्रव्यं वितर, लप्स्यते च ते यथाप्राप्यम् । न च कदाचिदपि तद्भाजनस्य द्रव्यं कियदिति परिगणनीय'मिति समुपदिदेश ।

अथ च तदीयमादेशं शिरसाऽभिनन्द्य बाण-मुनि-रस-भूसुरेश(१६७५)-परिमिते वर्षे तदीयकार्यजातमारम्भत् । अचिरेणैव च प्रतिष्ठायोग्यकार्यं सम्पाद्य वसु-समुद्र-रस-आकाश(१६७८)परिमिते संवत्सरे श्री१०८**स्वयम्भूपार्श्वनाथ**-प्रतिकृतिं प्रातिष्ठपत् । प्रतिष्ठानन्तरमनेकवर्षपर्यन्तं तत्रत्यकार्यजातं तथैव निराबाधं निरन्तरं समजायत ।

अथैकदा भाविविधिघटनाप्राबल्येन तन्मूलकं यतिवरवचनं विस्मृत्य तद्भाजनस्थं द्रव्यं कियदिति परिज्ञातुमगणयत् । गणयँश्च तदेव पञ्चशतपरिमितं द्रव्यमुपलभ्य जाततत्कालस्मृतिर्बहुतरनिन्दितस्वकीयव्यापारः प्रशंसितदैवमाहात्म्यश्च तदानीमेव सर्वकार्यजातमवारुन्धत् । तद्दिनादारभ्य तदवशेषीभूतमेवाऽऽसीत् । मध्ये चाऽनेकविधपाखण्डिजनानां विहारभूमिरभवत् । दृष्ट्वा च तत् प्रान्तीयजनाः केवलं दुःखमेवाऽनुभूयाऽप्रतीकार्यतया तूष्णीमासीषुः ।

अथैवं गतवति बहुतरसमये समयानुकूलतया नु, मरुदेशस्य भाग्योदयान्नु, अत्रत्यलोकपापक्षयान्नु, तेषां भाग्योदयान्नु, श्रीमत्पार्श्वनाथप्रभावान्नु कदाचिन्निज-सद्धर्मपद्धतिमनुसरन् विचरन् भुवनतलमनेकानेकविद्वज्जनजनताजनजेगीयमान-श्रुतिस्मृतिपुराणेतिहास-काव्यनाटकाख्यान-काव्यायिकालेखपटुताद्यनेकचातुर्य-चु(च)ञ्चुचरणकमल-चरणकमलचञ्चरीकायमानानवरतशिष्टविशिष्टविनीतशिष्योप-शिष्यसमाजसमाराधितपादमूल-पादमूलोपगतानेकतरराजराजन्मस्तकालङ्कार-प्रभापटलप्रद्योतितदशदिग्भागाविरतजैनशासनशासितप्रभूतजनसमाजसभाजित-संसत्-स्वकीयामृतरसकल्पनिरवसानव्याख्यानविख्यापितसद्धर्माचरणपूतकीर्ति-कीर्तिदूतकाभिसारिताष्टा(ष्ट)सिद्धि-समस्तमुनिजनहृत्पुण्डरीकविकाशविकाशित-ज्ञानप्रकाशतरणितरुणतेजःप्रकाशप्रभावपिहितान्तेवासिमानसतमःसञ्चार-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्चारितज्ञानप्रदीपप्रकटीकृतसर्वसम्पत्विषयविषधरपरित्यागमोक्षैकतानहृत्कमल-कर्णिकान्तःप्रविष्टजिनधर्मावधीरितसर्वमहामोहादिपरिषहविमलीकृतस्वान्तः श्रीमान् पूज्यवर्यार्यनृपवरकिरीटचुम्बितचरण आचार्यपरमभट्टारक**नेमिविजयसूरी**त्याख्या-विख्यातवसुमतीवसूपमानो दिदृक्षुस्तमुद्देशमाजगाम ।

आगत्य च श्रीस्वयम्भूपार्श्वनाथमभिवाद्य तन्निकटवर्तिश्रावकसमाज-प्रोत्साहितमनस्कस्तन्मन्दिरस्य पुनरुद्धर्तुमना मनागभूत् । व्यतीते च कतिपय-समये शर-भूतल-द्रव्य-चन्द्र(१९७५)परिमिते संवत्सरे सपने इव (स्वप्ने इव ?) तत्राऽऽगत्य तद्देशीयभक्तजनान् निजसदुपदेशेन प्रोत्साह्याऽसुलभजिनभक्तिभक्ति-सुलभीकृतनिजसद्धर्मपालनप्रयासपरायणै**र्बिलारा**वासि**पन्नालालवकील-माणिकलाल**प्रभृति-**पाली**वास्तव्यश्रेष्ठि**चान्दमल्लहीराचन्द**प्रमुखश्रीसङ्घानां समाजैः कृतसाहाय्यः समारभत पुनस्तदीयसंस्कारम् । संस्कृते च तस्मिन् अन्यानपि (न्यपि) देवप्रतिबिम्बाँस्तत्र(बिम्बानि तत्र) प्रतिष्ठापयितुमुद्युक्तवान् ।

अथ तदीयसम्भारसङ्घटननियुक्तैः श्रीसङ्घैरनतिदिनैरेव बहुतरभोज्य-पेयवसनशय्याद्यनेकोपकरणानि सम्पाद्य मुनिवराय सर्वं सुसज्जमिति व्यज्ञापि । संश्रुत्य च तदीयविज्ञापनमतिशयजाततत्कालसन्तोषः सर्वतो विमलपवित्र-चरित्रपवित्रीकृतजगतां सौगतसमाजसमाराधि[त]-मनसां जिनमतावलम्बि-साधुजनानां विविधशास्त्रपारावारपरितरणपरिश्रुतदिगन्तानामनेकविद्यासम्भार-भासुराणां विदुषां, निजातुलश्रीसमृद्धिधिक्कृतालकावैभवालीकहुङ्कारवत्कुबेराणां विविधरत्नरत्नाकरवैभवविख्यापनलब्धयशस्तोमानां मत्तमातङ्गघनघटाघटितदिवाऽपि कोकशोकानां निरस्तसमस्तोपसर्गानामपास्तकलिकालुषानां नानादिगन्तस्थानां श्रीसङ्घानां चाऽऽगमनाय निमन्त्रणपत्रं प्राहिणोत् ।

ते च समवाप्य निमन्त्रणपत्रं तत्काल एव सपरिवारा अगाधगुण-गरिमसम्भारगम्भीरं विश्वम्भराभोगभूषणीभूतप्रभूतवैभवं तरुणवारविलासिनी-जनकलितकरतालिकावलयावलीकल-कलनकिङ्किणीचरणमणिनूपुरक्वणितवेणु-वीणारवानुगतमृदुमृदङ्गध्वनिजनितहर्षप्रकर्षप्रकटिता-काण्डताण्डवाडम्बरोद्दण्ड-शिखण्डीमण्डलीमण्डितस्थण्डिलसनाथं, क्वचिदुपासनासक्तचित्तमुनिसङ्घसमृद्धं, क्वचिद् विद्वज्जनमण्डलीमण्डितानेकशास्त्रविचारप्रचारचमत्कृतं, क्वचिद् दर्शनागत-लोककोलाहलकलकलितं, क्वचित् खाद्यपदार्थरचनाचणचित्तानेकपा-चकजनजनितपरामर्शप्रकटितविशालवैभवं, क्वचिच्छीतलसुगन्धितजलभाण्डार-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भासितभूविभागं, क्वचित् सेवककरतलाञ्चितचटुलचामीकरबद्धचामरोद्भूत-चमत्कृतपवनं, क्वचिन्नानादिगन्तागतश्रीसङ्घहयहेषारवबधिरीकृतदिगन्तरं, क्वचिदागममन्त्रोच्चारणजनितपूतदिग्भागमगाधमहोत्सवसमृद्धं सुधाधवलितमन्दिरमासेदुः ।

समागत्य च ते प्रथमं सर्वदुःखहरणक्षमं पार्श्वनाथं प्रणम्याऽनन्तरं सविनयं सप्रणयं सानन्दं सभक्ति च मुनिवरं प्रणम्य तदीयातुलविभवं च विलोक्य मनस्येवं व्यचिन्तयन् - 'किमयं कोऽपि भूपतिलकः प्रच्छन्नमुनिवेषः ? किमु विशाल-विभवशाली कोऽपि ? अथवा श्रीमान् लक्ष्मीपतिः साक्षाद् ? आहोस्वित् स्वर्गादवतीर्णः शचीपतिः ? किमयं स एवाऽस्माकं निजदर्शन-स्पर्शनसनाथि-मानवजन्माचार्यवर्यश्रीमान्**नेमिविजयसूरि**रेव निजतपोलब्धाष्टसिद्धि ?-रितिनाना-विधशङ्कातङ्कचित्तवृत्तयोऽभूवन् ।

अथ समुपक्रान्ते च प्रतिष्ठाविधौ तत्रत्यसङ्गृहीतमनुजविग्रहा विग्रहा इव राक्षसा विविधशस्त्रास्त्रसहचरा यज्ञविघ्नकर्तारो राक्षसा इव कतिचिन्मानवाः समं पापतन् तत्राऽनेकविधयज्ञविघ्नाय समापुञ्जन्त ।

अथ केनाऽपि कथिततदीयदुराचारकथो मुनिवरस्तदानीमेवाऽनेकविघ्न-प्रणाशपटिष्ठप्रख्यातपराक्रमं राजपुरुषं विश्वामित्र इव रघुवरतिलकमानाय्य निर्विघ्नतया समाप्तिमनयत् प्रतिष्ठाविधिम् । अनियमयच्च प्रतिवर्षं माघशुक्लश्रीपञ्चम्यां तदीयदर्शनागतजनसङ्घानामेकत्री(त्र)भवनमिति । अद्याऽपि च तद्दिने देशदेशान्तरा-गतजनसङ्घातस्तत्रत्यजिनमन्दिरं साधुवरसंस्थापितमनेकविधमागतजनानां शय्या-भोज्य-प्रदानं चाऽवलोक्य के न तदीयपुण्यप्रभावचकितचित्तास्तं मुहुर्मुहुर्नत्वा प्रशंसन्ति ?

एवंविधमहाप्रभावोऽसौ मुनिवरोऽनेकानेकदेवमन्दिरोद्धारोद्धारकरणजनित-यशस्तोमेन देवलोकेऽपि निजयशोलेखनपत्रदारिद्र्यमचीकरत् । किं पुनस्तदीय-गुणवर्णनमल्पाल्पतरमतयो निर्जीवलेखनीतो मनुष्यकाः कर्तुमर्हन्ति ?

॥ इति भूयो भूयोऽतिप्रह्वाञ्जलिर्विनयनतकन्धरः प्रणम्य विज्ञापयामि यत् किलाऽत्र मदीयमन्दबुद्ध्या सञ्जातदोषकोषस्तदमर्षणीयोऽपि मर्षणीयः करुणावरुणालयैः स्वभावसहिष्णुभिर्देवकल्पैर्मुनिवरैस्तदीयानुगतशिष्यैश्चेति विरमामि ॥

॥ शुभमस्त्वग्रे ॥

—x—



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चिन्तनधारा

**मुनिरत्नकीर्तिविजयः**

समस्या वाऽऽपत्तिर्वा जीवनस्यैवैकांशरूपा । संसारेण सह समस्याः संयुक्ता एव । पारिवारिक-सामाजिक-राजकीया-ऽऽर्थिक-शारीरिकाद्यनेकविधाभिः समस्याभिः पीडितोऽस्ति मनुष्यः । न कोऽपि सर्वथा समस्यामुक्तोऽस्ति ।

पीडा त्वस्त्येव । सर्वेऽपि तामनुभवन्त्यपि । किन्तु न पीडायाः परिमाणं समस्यायाः परिमाणेन सम्बद्धं किञ्चिदस्ति । तद्धि समस्यां प्रत्यस्माकमभिगमेन सह सम्बद्धमस्ति । उपस्थिता समस्या कीदृश्यस्तीत्यत्र प्रमाणं तां प्रति मनुष्यस्याऽभिगम एव । अभिगमोऽयं शक्तिरूपः कश्चिदस्ति येनाऽणुप्रमाणमपि सुखं पर्वतायते, पर्वतमानं च दुःखमप्यणुतुल्यं प्रतिभासते । अतो विपरीतमपि भवत्येव ।

सर्वत्र परिदृश्यतेऽपि यत् – केचित् 'केन्सर'रोगमपि स्वाभाविकतया स्वीकृत्य हसन्त एव जीवनं यापयन्ति, केचिच्च सामान्यं ज्वरमपि सोढुं न पारयन्ति । केचित् प्रभूतामपि धनादीनां हानिं सधैर्यमुपेक्षन्ते उपसहन्ति च, अन्ये ह्यास्तां हानिर्हानेः सम्भावनयाऽपि विक्षिप्ता भवन्ति, कदाचिच्चाऽल्पहान्या-ऽऽत्मघातमपि कुर्वन्ति । केचित् परस्य सदपि स्वभाववैचित्र्यं स्वभावप्रातिकूल्यं मनुष्यसहजमिति कृत्वा स्वीकृत्य ततोऽपि सारतत्त्वमन्विष्य प्रसन्नतामनुभवन्ति; अपरे हि स्वकल्पितं वास्तवं वाऽपि परस्य स्वभाववैचित्र्यमसहमाना तं प्रति स्वकीयमसन्तोषमभिव्यञ्जन्ति ।

तुकारामस्य जीवनस्य कश्चित् प्रसङ्गोऽस्ति – तस्य पत्नी कर्कशाऽऽसीत् । नित्यमेव सा तेन सह कलहं करोति स्म । किन्तु साधुत्वपूर्णहृदयः स न कदाऽपि तां प्रतिकरोति स्म । नाऽपि तां तत्स्वभावं चाऽधिकृत्य कदाऽपि कुत्राऽपि वाऽसन्तोषं प्रकटयति स्माऽपि । दारिद्र्यमेवाऽत्र कारणमिति स जानाति स्मैव ।

गृहीतेक्षुयष्टिः स एकदा गृहमागतः । भोजनायाऽद्य किमानीतमिति पत्न्या



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्टः स तां यष्टिं तस्यै आर्पयत् । ईक्षुयष्टिं दृष्ट्वा प्रदीप्तकोपा सा तां यष्टिमुत्पाट्य तस्य शिरसि प्रहृतवती । प्रहारेण तेन यष्टेर्भागद्वयं सञ्जातम् । तद् दृष्ट्वा तुकारामो हसन्नेवोक्तवान् - 'हम्..... अहं जानामि स्मैव यद् भवती नैकाकिनी कदाऽपि भक्षये'दिति ।

एतादृशोऽपि जना विद्यन्ते ये ईदृशीमपि समस्यामविगणय्य जीवनं स्वस्थतयैव यापयन्ति। अत्र समस्यां प्रति तेषामभिगम एव कारणम् ।

अध्यापकः कश्चिद् विद्यार्थिन उद्दिश्य विषयमेनमधिकृत्य यत् शिक्षितवान् तद् वयमपि पश्यामः -

अध्यापकस्य वर्गप्रवेशेन सहैव शान्तिः प्रसृता । सर्वेऽपि साश्चर्यं दृष्टवन्तो यदद्याऽध्यापकस्य हस्ते दुग्धचषकोऽस्ति । आगमनेन सहैवाऽध्यापको वर्गं पृष्टवान्-

मया गृहीतस्य दुग्धपूर्णस्याऽस्य चषकस्य भारः कियानिति किं भवन्तः कल्पयितुं शक्नुयुः ?

अधिकेनाऽऽश्चर्येण सर्वेऽपि १०० ग्राम-१५० ग्राम-इत्यादीन् विभिन्नान् प्रत्युत्तरान् प्राददुः ।

'यावदेनं चषकं न तोलयेयं तावदस्य निश्चितं परिमाणं ज्ञातुं न शक्यम्। सत्यं किल ?'- अध्यापक उवाच ।

'सत्यमेव' - सर्वेऽपि सहैव प्रत्युदत्तरन् ।

'अथ, चषकमेनं यद्यहं हस्त एव कतिपयनिमेषान् यावद् गृह्णीयां, तर्हि ?'

'किमपि नवीनं नैव भवेत् !' - कश्चिदवदत् ।

'हममम्..., अथ यदि चषकमेनं घण्टापर्यन्तं गृह्णीयां, तर्हि ?'

'तर्हि हस्ते पीडा समुद्भवेत् ।'

'सत्यम् । किन्तु, आदिनं यद्यहं चषकमेनं गृहीत्वा तिष्ठेयं तदा कः परिणामः ?'

'महोदय ! तथा तु भवतो हस्तो जड एव स्यात्, कदाचित् पक्षाघातोऽपि स्यात् । चिकित्सालये तु गन्तव्यमेव स्यात्....' । - अनेन प्रत्युत्तरेण समग्रेऽपि वर्गे हास्यं प्रसृतम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्यन्तं शोभनम् । किन्तु, अत्राऽन्तरे किं चपकस्य माने वृद्धिर्हानिर्वा स्यादपि ?'

'नैव ।'

'अथोच्यताम्-मम हस्ते पीडा किमर्थमुत्पन्ना ? पीडातो रक्षणार्थं मया किं कर्तव्यमासीत् ?'

'सरलमेतद्, चषकोऽधः स्थापयितव्य आसीत् ।'

'अत्युत्तमम् ! अस्माकं जीवनेऽप्युत्थीयमानेषु प्रश्नेष्वप्येष एव न्यायः समापतति । यदि ते प्रश्नाः स्वल्पमेव कालं मनसि तिष्ठेयुः, न काऽप्यापत्तिः । यदि किञ्चिदधिकं कालं तानधिकृत्य विचार्येत तर्हि ते पीडामुत्पादयन्ति । एवं सत्यपि यदि भवन्तः सावधानीभूय ततो न मुक्ताः स्युस्तर्हि ते पक्षाघातमिव किञ्चित् सञ्जनयिष्यन्ति । अन्यत् किमपि कार्यजातं कर्तुं नाऽलं भविष्यन्ति भवन्तः । जीवनप्रश्नानधिकृत्य विचारणं यद्यपि महत्त्वपूर्णं किन्तु समयेन सह तेषामुपेक्षणमपि तावन्महत्त्वपूर्णमेव । येनाऽऽगामिनि काले समुत्थीयमानानां नवानां प्रश्नानां सम्मुखीकरणे निर्भराः सन्तः सज्जा भवन्तः स्युः ।'-

इति अध्यापकस्य निरूपणेन सहैव समग्रोऽपि वर्गो हस्ततालैः सम्भृत इव सञ्जातः ।

एष दृष्टान्तः सर्वमपि सूचयत्येव । नाऽधिकमत्र किमपि वक्तव्यमस्ति ।

प्रकाशमभ्यस्यतु नाम विद्या
सौजन्यमभ्यासवशादलभ्यम् ।
कर्णौ सपत्न्यः प्रविशालयेयु-
र्विशालयेदक्षियुगं न कोऽपि ॥
[सुभाषितरत्नभाण्डागारे]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# समाधिमृत्युः

मुनिधर्मकीर्तिविजयः

प्रक्षालिताघपङ्का ये मृताः पण्डितमृत्युना ।
सतां ते हर्षदातारो न तु शोच्याः कदाचन ॥

सर्वेषामपि जनानां मृत्युर्निश्चितोऽस्ति । यो जातस्तस्य मृत्युरस्त्येव एष तु सृष्टिक्रमोऽस्ति । यद्येष क्रमो न स्यात्तर्हि संसार एव न स्यात् । संसारो नाम जननं मरणं चैव । यावत् शिवसुखं न लब्धं तावच्चतुर्षु गतिषु भ्रमणं करणीयमेवाऽस्ति । श्रीमहावीरविभुर्बुद्धो रामः कृष्णश्चेति सर्वैरपि महापुरुषैरेतैरेतद् मरणदुःखमनुभूतमेव ।

अद्य 'मृत्यु'शब्दो बहुपरिचितः सहजश्च जातोऽस्ति । प्रतिदिनमनेकेषां जनानां मरणं भवति । तत्र कदाचिद् मित्राणि, कदाचित् स्नेहिनः, कदाचित् परिचिताः कदाचित्त्वपरिचिताश्च जना म्रियन्ते । प्रातःकालादारभ्य स्वपनपर्यन्तं "ह्य एष मृतः, अद्यैष मृतः, अद्यैष आसन्नमरणोऽस्ति" इति वाक्येषु मरणशब्दोऽनेकशः श्रुतिपथमायाति । अद्य जनके जीवति सति पुत्रो म्रियते, वृद्धे मृत्युशय्यायामालुठति सति बलिष्ठः स्वस्थश्च युवा म्रियते, पुत्रादित्रयं विहाय जननी मृत्युमाप्नोति, कुटुम्बस्याऽऽधाररूप एकाकी पुत्रो म्रियते तदा गृहस्याऽन्यजना निराधारा भवन्ति - इत्यतीव करुणाजनिका दुःखदाश्च घटना निरन्तर-मनुभूयन्तेऽस्माभिः, तथाऽपि मनस्युद्वेगो हृदि च सन्तापो नाऽनुभूयते । अद्य वयं सर्वेऽपि संवेदनबधिराः प्रेमशून्याः करुणाविहीनाश्च जाताः । संवेदना प्रेम करुणा च जीवनस्य प्राणाः सन्ति । ते एव यस्य हृदये न सन्ति ते जीवन्तः सन्तोऽपि मृता इव ज्ञेयाः । जीवच्छवतुल्या वयं सर्वेऽपि वसामः । अद्याऽहर्निशं संसारस्याऽसारताज्ञापिका बोधदायिन्यश्च बहव्यो दुर्घटना घटन्ते तथाऽपि संवेदनाशून्यत्वाद् मनसि लेशोऽपि बोधो नोज्जागर्ति, न च चित्ते उद्वेगो हृदि च सन्तापोऽनुभूयते । पूर्वस्मिन् काले तु मृत्युशब्दं निशम्यैव जनैर्मनसि खिन्नता संसारस्य च नश्वरताऽनुभूयते स्म तथा तत्क्षणे एव-परश्वो मेऽपि मरणं सम्भवेत् - इति विचिन्त्य जना धर्मकार्येषु मनो निमज्जयन्ति स्म, क्लेश-उद्वेग-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तापादिदुर्भावान् चाऽपि त्यजन्ति स्म ।

पूर्वकालेऽपि मरणं तु भवति स्मैव, किन्त्वेतादृशानीयन्ति च मरणानि न भवन्ति स्म । अद्य तु मृत्युः कस्मिन्नपि क्षणे आगच्छति । पञ्चक्षणपूर्वं येन[1] यन्मित्रेण सह भक्षितं मीलितमटितं च स मृत - इति बहुशः श्रुतमनुभूतं चाऽस्माभिः । अपघात (Accident) विस्फोट (Bomb blast) - वध-आत्मघात इति दुर्घटनाः प्रतिदिनं भवन्ति, न तत्रैको जनोऽपि तु बहवो जना म्रियन्ते । एवमद्य मरणं तु सहजमस्ति । ततो जनो म्रियते तत्र नाऽऽश्चर्यं किन्तु कया रीत्या जनो मृतस्तत्रैवाऽऽश्चर्यमस्ति । अद्य प्रायो जना उद्वेगं क्लेशं सन्तापं च कुर्वन्तो म्रियन्ते, केचिद् रुदन्तः, केचिद् गृहचिन्तां कुर्वन्तः, केचित् परनिन्दायां रममाणाः, केचिद् वार्तालापं कुर्वन्तः, केचिद् युद्धं कुर्वन्तः, केचित्तु शयाना एव म्रियन्ते, किन्तु केचिद् विरलजना एव हसन्तः स्वस्थ-प्रसन्नचित्तपूर्वकं धर्माराधनं च कुर्वन्तो प्राणान् मुञ्चन्ति । यथा गृहजनाः सस्नेहमागच्छतामतिथीनां स्वागतं कुर्वन्ति तथैव ये जना मृत्युभयं विहाय सबलं सादरं च हसन्तो मृत्योः स्वागतीकर्तुं सन्मुखं चलन्ति, तेषामेव मरणं श्रेष्ठम् । ते एव जनाः प्रशंसनीयाः सन्ति, येषां मृत्योः पश्चाद् "अस्य जननमपि सफलं मरणं चाऽपि सार्थक"मिति वर्ण्यते । विकटपरिस्थित्यां तीव्रवेदनायां च सत्यामपि यस्य चित्ते न क्लेशादयः स्युः, प्रसन्नतापूर्वकं व्यवहरेद् यः, मनसि केवलं प्रभुनाम रमेत, गृहचिन्ताया भारो न विद्येत, सर्वजीवान् प्रति समभावो वर्तेत, एतस्यास्तीव्रपीडाया मुक्तिर्भवेदिति चिन्ता मनसि न स्यात्, मृत्योर्भयमपि न वर्तेत, यस्य ग्रहणकाले यमराजोऽपि लघुतामनुभवेत् तस्य जनस्य मृत्युरपि महोत्सवो जायते । तादृशस्य जनस्य मृत्योः पश्चात् शोकोऽपि न करणीयः । यत एष त्वानन्दक्षणोऽस्ति ।

सामान्यतो मृत्युर्दुःखदाऽशुभघटना चाऽस्तीति जनैर्वर्ण्यते दृश्यते च, सर्वत्र मृत्युरशुभो भयङ्करश्चेति वर्णितम् । किन्तु श्लोकेऽस्मिन् ज्ञानिभगवता- "मरणमपि सुखद-मङ्गलक्षणरूपेण वर्णितम् । ये जनाः समाधिभावेन मृतास्तेषां मरणमुत्तमं तथा तेषां कृते शोक उद्वेगश्च न करणीय" इति कथितम् । जिनशासनस्य लोकोत्तरता महत्ता चाऽत्रैवाऽस्ति यद्, अत्र मरणमपि प्रशस्यं समादरणीयं च, यतो

१. यैः समं क्रीडिता ये च भृशमीडिताः, यैः सहाऽकृष्महि प्रीतिवादम् ।
तान् जनान् वीक्ष्य बत भस्मभूयङ्गतान्निर्विशङ्काः स्म इति धिक् प्रमादम् ॥
(शान्तसुधारसकाव्यम्)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरणं समाधिश्चाऽपि भगवत्पार्श्वे प्रार्थितः। श्रीमहावीरभगवता श्रीउत्तराध्ययनसूत्रे मरणमुद्दिश्यैवैकमध्ययनं प्ररूपितम्। तत्र मुख्यतया बालमरणं पण्डितमरणं चेति मरणं द्विविधं निर्दिष्टम्। तत्र सदसद्विवेकविकलानां विषयाभिष्वङ्गतो मरणमनिच्छतामविरतानां च बालजीवानां मरणं बालमरणमुच्यते। यथा-

संयमयोगैर्विषण्णा अतिदुश्चरं तपश्चरणमाचरितुमक्षमा व्रतं च मोक्तुमशक्नुवन्तः कथञ्चिदस्माकमितो मुक्तिरस्त्विति विचिन्तयन्तो म्रियन्ते यत्तद् वलनां-संयमात् निवर्तमानानां मरणं **वलन्मरणम्**।

इन्द्रियविषयवशगताः स्निग्धदीपकलिकावलोकनाकुलितपतङ्गवद् म्रियन्ते यत्तद् **वशार्तमरणम्**।

दर्शनज्ञानचारित्रविषये लज्जया सातर्द्धिरसगौरवेण बहुश्रुतमदेन च यद् दुश्चरितं तद् गुरुभ्यो न निवेदयति यस्तस्य मरणं **सशल्यमरणम्**।

यस्मिन् भवे वर्तते जन्तुस्तद्भवयोग्यमेवाऽऽयुर्बद्ध्वा पुनस्तत्क्षयेण म्रियमाणस्य तद् **भवमरण**मित्यादि।

एवं बाह्यदृष्ट्याऽपि बालमरणमनेकविधमस्ति। यथा गर्भे एव मरणं, गर्भपाते कृते सति मरणं, मन्त्रतन्त्रादिप्रयोगैर्मरणं, जनन्या स्तनपानाद् विमुक्ते सति मरणं, योगिन्यै बलिरूपेण दीयमाने सति मरणं, ज्वर-भगन्दर-कुष्ठरोगादिभिर्मरणं, सिंहादिक्रूरप्राणिभिः मरणं, वज्र-असि-बम-भुषुण्डिप्रमुखसाधनैर्मरणं, भृगुपातेन मरणं, विषभक्षणेन मरणम्, इष्टवियोग-अनिष्टसंयोगादिना मरणम्-एतत्सर्वमपि मरणं **बालमरण**मुच्यते। एतत्तु संसारस्य कारणमस्ति। तत एव बालमरणमप्रशस्त-रूपेण वर्णितमस्ति।

किं नाम पण्डितमरणम्? सर्वसावद्यनिवृत्तिमभ्युपगतानां श्रद्धावतां सञ्चिततपोधनानां व्रतनियमसंयमरतानां मरणं प्रत्यत्रस्तानां च तथा मरणेऽप्य-पहतमोहरेणुतयाऽनाकुलचेतसां सम्यग्दृष्टीनां जीवानां मरणं पण्डितमरणमुच्यते। एवमेतेषां जीवानां चित्तस्य परिणतिः स्फटिकवदायुःक्षयकालेऽपि निर्मलाऽस्ति। पूर्वकृतानि पापकर्माणि निन्दन्तः, सर्वान् जीवान् क्षममाणाः, अर्हदादीनां मङ्गलशरणं स्वीकुर्वन्तः, नमस्कारमहामन्त्रं स्मरन्तश्च प्रशमभावेन सहजतया च मृत्योः स्वीकरणं कुर्वन्ति जीवा एते। "मृत्युरवश्यंभावी, जातस्य हि ध्रुवो मृत्युः, अस्मिन् लोके एकमपि स्थानं नाऽवशिष्टं यदस्माभिरनन्तशो जन्ममरणैर्नाऽवाप्तम्", इत्येतानि वचनानि तु सर्वैरपि स्वीक्रियन्ते तथाऽपि बालजीवा यदा व्याधिग्रस्ता भवेयुस्तदा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते व्याकुला भीता वराका दीनवदनाश्च भवन्ति, किन्तु ये ज्ञानिनः पण्डिताश्च सन्ति ते तु प्रशमभावे रमन्ते। व्याधिरपि कर्मक्षयस्य कारणमस्ति तथा देहासक्तेर्ह्रासस्याऽपि निदानमस्तीति ते मन्यन्ते। मरणशय्यायामालुठन्तः सन्तोऽप्येते न भीता अस्वस्थाश्च भवन्ति, तत एव ज्ञानिजनैरेतद् मरणं प्रशंसितम्। जैनेषु जन्म विविधबन्धनानां हेतुरस्ति ततो जन्म हेयरूपेणाऽङ्गीक्रियते। समाधिमरणं पण्डितमरणं त्वाधि-व्याधि-उपाधियुतस्य संसारस्य बन्धनेभ्यो मुक्तिं ददाति तत एव तदुपादेय-रूपेणोररीक्रियते। येन जीवेनैतद् समाधिमरणमवाप्तं तस्य संसारः परिमितो भवति। उक्तं च-

एकं पण्डितमरणं प्रतिपद्यते सुपुरुषोऽसंभ्रान्तः।
क्षिप्रं सोऽनन्ताना-मन्तं करोति मरणानाम्॥

'अन्ते समाहिमरणं अभव्वजीवा ण पावेंति' त्ति वचनाद् ये केऽपि जीवा एतादृशं समाधिमरणं नाऽवाप्नुवन्ति, किन्तु भव्यजीवा एव पण्डित-(समाधि)मरणं प्राप्नुवन्ति। जगति सत्ता प्रतिष्ठा सम्पत्तिर्महत्ता सुखमनुकूल-कौटुम्बिकाश्चेति सर्वमपि सुलभं, किन्तु समाधिमरणं तु दुर्लभमस्ति। तत एव विद्वद्भिः सूरिपुङ्गवैश्चाऽपि समाधिमरणमेतद् याचितम्। प्रायो जैनधर्ममङ्गीकुर्वद्भिः सर्वजनैः श्रीतीर्थकराणां समक्षं समाधिमरणं नित्यं याच्यते। समाधिमरणं येनाऽवाप्तं तस्य प्रशंसां विबुधा अपि कुर्वन्ति तथा स एव श्लाघनीयः पुण्यवाँश्च मन्यतेऽमरैः। यस्य जीवने सरलता निरभिमानिता दम्भशून्यता च, व्यवहारे औदार्यं, वाचि सत्यता मधुरता च, चित्ते करुणा समभावश्च वर्तन्ते स एव समाधिमृत्योरधिकारी भवति। समाधिं विना केवलं ज्ञानेन तपसा क्रियया भक्त्या च किम्? एतत् सर्वमपि समाधिप्राप्तेः साधनमस्ति। बहुकोटिवर्षाणि यावदाचरितेनाऽपि ज्ञानादिधर्मेण यो लाभोऽवाप्यते ततोऽप्यधिकं लाभं मृत्योरन्तिमक्षणे समाधिभावे रममाणो जनः प्राप्नोति-इति समाधिमरणस्य महत्ता गीयते ज्ञानिभिः। उक्तं च-

यत् फलं प्राप्यते सद्भि-र्व्रतायासविडम्बनात्।
तत् फलं सुखसाध्यं स्याद् मृत्युकाले समाधिना॥

अस्माभिर्ज्ञानादिकस्याऽवाप्त्यर्थं बहवः प्रयत्नाः क्रियन्ते, किन्तु समाधिप्राप्त्यर्थं किं विधीयते? उद्वेग-क्लेश-सन्ताप-राग-द्वेषेषु निरन्तरं रममाणैरस्माभिः समाधिः कथं कदा वाऽवाप्स्यते? अस्मिन् कालेऽपि समाधिभावे विलसन्तो बहवो जीवा विद्यन्ते। एते तु प्रसिद्धि-महत्त्वाकाङ्क्षाया दूरमेव



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसन्ति, केवलं स्वकल्याणचिन्तायामेव निमग्ना भवन्ति ।

इदानीमेवैकः प्रसङ्गो जातः ।

श्रीविनोदभाईमहोदयो नवसारीनगरे वसति । एष संसारसम्बन्धेन मे जनकोऽस्ति । तेन समाधिमृत्युरवाप्तः ।

सप्तमासेभ्यः पूर्वं कर्णावती(अमदावाद)नगरे वन्दनार्थमागतवान् सः । दिनत्रयमुषित्वा स्वगृहं गतवान् । सहसैवोदरे तीव्रपीडा समुत्पन्ना । चिकित्सकैः परीक्ष्य 'केन्सर' रोगोऽस्तीत्युक्तम् । एतस्य रोगस्य नामाऽपि निशम्यैव जना हताशाः स्तब्धाः किंकर्तव्यमूढाश्च भवन्ति । किन्तु पूज्यपादानां श्रीशीलचन्द्रसूरीश्वर-भगवतां सदुपदेशेन स्वकीयात्मबलेन चैतेन महोदयेन रोगस्य सहजः स्वीकारः कृतस्तथा तत्क्षणे एव निर्णीतं यत् – न कारणीया शस्त्रक्रिया, न च विदेशीयौषधमपि ग्रहणीयम् । इतः परं धर्माराधनं प्रभुस्मरणं चैव मे औषधमस्ति । विधेयात्मकदृष्ट्या तेनैष रोगः स्वीकृतः, हृदयाघात(Attack)-अपघात(Accident)-इत्यादीनि यदि स्युस्तर्हि धर्माराधनस्याऽवसरोऽपि न मयाऽवाप्येत । एतेन रोगेण तु सूचना दत्ता – भो ! मरणं समीपमस्ति, अतो धर्माराधनं कुरु, इति । तत्क्षणादेव जीवने परिवर्तनमप्यानीतमेतेन महोदयेन ।

प्रारम्भे कौटुम्बिक-सामाजिक-व्यापारसम्बन्धेनैवं येन केन प्रकारेण यैर्यैर्जनैः- सह रागद्वेषयोः सम्बन्धो जातस्तान् सर्वानपि मनसिकृत्य क्षमापनपत्रं लिखित्वा क्षमा याचितैतेन महोदयेन । सर्वे जना मां क्षमन्ताम्, एतां च वेदनां सोढुं मयि सामर्थ्यं प्रकटीभवेदिति प्रार्थना कृता । तत्पश्चात् समस्तदिने केवलं प्रभुस्मरणं, धर्मशास्त्रश्रवणं प्रभुसेवां चैवाऽकरोत्, न च काऽपि संसारस्य व्यवहारस्य च चिन्ताम् । ये केऽपि मीलितुमागच्छेयुस्तैः सह क्षणं वार्तालापं विधाय मां धर्मशास्त्रश्रवणं कारयत्विति कथयति स्म । यदि कदाचित् कोऽपि रुद्यात्, संसारवार्तां च कुर्यात्तर्हि त्वरितमेव 'भो ! बहिर्गत्वा रोदनीयम्, तत्रैषा चर्चा करणीया, अत्र तु नैवे'ति कथयति स्म । येन मनसि क्लेशो दुर्ध्यानं च स्यात्तादृशं न कमप्यालम्बनमासेवते स्म । चतुर्षु मासेष्वन्तिमेषु तु तीव्रपीडावशेनाऽऽहार एव न ग्रहीतुं शक्य आसीत् ! जलमप्यत्यन्तमल्पं ग्रहीतुं शक्यमासीत् तथाऽपि न दीनतोद्विग्नता चाऽनुभूता । दृढतयैतादृशी तीव्रवेदनाऽपि स्वस्थचित्तेन सोढा । 'किं भविष्यति ? किमपि करोतु' इत्यपि नोक्तम् । एतादृश्यामवस्थायामपि स्वकीयं धर्मकार्यं धर्मश्रवणं च न त्यक्तम् । तथैक एवाऽभिलाष आसेवितो यत्-संयमं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहीत्वा भवसमुद्रस्य पारं गच्छेयम्, इति ।

आश्चर्यं त्वेतद् यद्-एतादृश्यामवस्थायामपि न मन्त्र-तन्त्राश्रयः कृतः, आयुर्वर्धनार्थं, रोगनाशार्थमुपचारमार्गणार्थं च न कदाऽपि प्रार्थना कृता, तथा न कदाऽपि हीनविचारो दुर्भावश्च कृतस्तेन । केवलमेकदैव 'कदा पीडाया मुक्तिः स्यात्' इति तच्चित्ते विचार उद्भूतः, किन्तु तत्क्षणे एव मनसि पश्चात्तापोऽपि कृतस्त्वरितमेव च गुरुदेवेभ्यः सकाशात् प्रायश्चित्तमपि याचितम्, एतेनाऽस्य महोदयस्य चित्ते कीदृशी तीव्रा जागृतिरासीदिति प्रतिभाति । महोदयेनैतेन तु सदैकैव प्रार्थना कृता - पूर्वभवे कृतस्य पापस्योदयोऽस्त्ययम् । अतोऽस्यां परिस्थित्यां चित्तस्य समाधिः स्थिरीभवेत्, मनसि दुर्भावा अशुभविकल्पाश्च नोद्भवेयुस्तथा स्वस्थचित्तेनैतां वेदनां सोढुं शक्तिमान् भवेयमिति ।

अन्तिमकाले क्लेशमुद्वेगं च विना प्रसन्नचित्तेन धर्मश्रवणं गुरुमुखा-दर्हदादिशरणं चाऽङ्गीकृत्य यथा जीवो वस्त्राणि त्यजति तथैव सहजभावेन व्याकुलतारहितेन च तेनैतं पार्थिवदेहं विहाय समाधिमृत्युरवाप्तः ।

अन्ते, मरणं तु निश्चितमस्ति । कदा कथं वेति न ज्ञायते, किन्तु समाधिभावेन मृत्युः प्रापणीयो न वा ? एतत्त्वस्माकमुपर्यवलम्बते । यदि जीवनं सरलं निर्दम्भं धर्मरतं च भवेत् तदैव समाधिमरणं सुलभं भवेत् ।

मा भूत् सज्जनयोगो
यदि योगो मा पुनः स्नेहः ।
स्नेहो यदि विरहो मा
यदि विरहो जीविताशा का ? ॥

[सुभाषितरत्नभाण्डागारे]



Jain Education International For Private & Personal Use Only www.jainelibrary.org




# संवेदनशीलता पशु-पक्षिणाम्



मुनिकल्याणकीर्तिविजयः

**'स्वतः प्रमाणं ? परतः प्रमाणं ?', कीराङ्गना यत्र गिरो गिरन्ति ।**
**द्वारस्थनीडान्तरसन्निरुद्धा, जानीहि तं मण्डनमिश्रगेहम् ॥**

श्रूयते यत् मण्डनमिश्रादीनां विद्यावाचस्पतीनां गृह-पाठशालादिषु तथाविधं सघनं पठन-पाठनादिकं प्रावर्तत यत्-आदिनं तर्कपूर्णसँल्लापपरान् विद्यार्थिनो गतागतं कुर्वाणान् विलोक्य परितो वर्तमानाः पक्षिणोऽपि तच्छ्रवणेनाऽत्यन्तं भाविताः सन्तस्तदेव गिरन्ति स्मेति ।

पशु-पक्षिणो हि यद्यपि स्वमनोगतमभिव्यक्तीकर्तुं नैव समर्थास्तथाऽपि ते वातावरणं परिसरं च प्रत्यतीव संवेदनशीला भवन्ति । प्रायशश्च मनुष्यवदेव यथापरिसरं भाविता भवन्ति ।

अत्राऽर्थे च प्रसिद्धा कथाऽप्यस्माभिः श्रुतचरैव, यथा-केनचिद् व्याधेनैकदाऽरण्याद् द्वौ शुकशावकौ गृहीतौ विक्रीतौ च तयोरेकतरश्चौरेभ्योऽन्यश्च सज्जनाय कस्मैचित् । चौरैः स शावकः स्वीयस्थानाद् बहिः पञ्जरस्थः स्थापितः सज्जनेन च कस्यचित् सन्न्यासिन आश्रमस्याऽङ्गणे । अथैकदा कश्चन राजा मृगयार्थमटव्यां परिभ्राम्यन् मार्गभ्रष्टः सन् तच्चौरस्थानान्तिकं प्राप्तः । तं दूरतो विलोक्यैव स शुकशावक उच्चैराक्रोशन्निव विरौति स्म यत्- 'गृह्यतां गृह्यतामेष सधनः कश्चिद् याति, मार्यतां तं धनं च गृह्यता'मित्यादि । एतच्छुत्वा भीतो राजा सत्वरं ततः पलायितः ।

अग्रे गच्छन् तस्य सन्न्यासिनो मठं प्राप्तो यत्र द्वितीयः शुकशावक आसीत् । राजानमागच्छन्तं दृष्ट्वैव स शावको मधुरं विरौति स्म यथा, 'आगम्यतामागम्यतां, स्वागतं भवतः, जलपानं क्रियतां, किञ्चिद् विश्रम्यता'मित्यादि । एतान् कर्णप्रियान्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दान् श्रुत्वा मुदितो राजाऽऽश्रमान्तः प्रविष्टस्तत्रत्यैश्च सत्कारं प्राप्तः । ततः स सन्यासिनमुभयोः पक्षिणोर्वृत्तं कथितवान् तदा 'द्वावप्येतौ शावकौ सोदरावेव, किन्तु परिसरस्य वातावरणस्य च प्रभावाद् द्वयोरीदृशी परिस्थिति'रिति तं बोधितवान् सन्यासी ।

अथाऽत्राऽन्योऽपि प्रसङ्गः स्मरणार्हः । स च चतुर्विंशतीर्थकृत्-श्रीमन्महावीरस्वामिचरितान्तर्गतस्य जिनदासश्रेष्ठिनः । स श्रेष्ठी हि श्रावकत्वात् हिंसादोषभयान्न पश्वादीन् पालयति स्म । किन्तु कदाचित् तस्योत्तमव्यवहारेण तुष्टः कश्चन कृषिकस्तस्मै श्वेतवर्णं पुष्टाङ्गं सुरूपं च वत्सतरद्वयं समर्पितवान् । 'मैतौ कोऽप्यन्यः कृषिकार्यादिषु योजयतु' - इति चिन्तयता तेन तौ स्वयमेव पालितौ, शुद्धान्नपानादिना च पोषितौ । कालेन च तौ द्वावपि सर्वाङ्गसुन्दरौ सुदृढौ च बलीवर्दौ सञ्जातौ । विशेषस्त्वयमेव यत् तयोर्द्वयोरपि सर्वदा श्रेष्ठिनः शुद्धां धर्मचर्यां निरवद्यमाचरणं सद्व्यवहारं च दृष्ट्वा धर्मस्यैव बुद्धिर्भवति स्म । यदा यदा श्रेष्ठी धर्मक्रियां करोति स्म तदा तदा तावपि निश्चलीभूयैकाग्रतया मनसैव तां कुर्वन्ताविव लक्ष्येते स्म । पर्वदिनेषु यदा श्रेष्ठिनः पौषधोपवासादिकं भवति तदा तावपि किमप्यभुञ्जानावुपोषितावेव भवतः स्म । प्रत्यहं च रात्रौ न भुञ्जाते स्म भद्रव्यवहारेण च वर्तेते स्म । नूनमयं परिसरस्यैव प्रभावः खलु !

एवमेवैकस्य राज्ञः पट्टहस्तिनोऽपि चर्याऽत्र चिन्तनीया । एकस्य राज्ञः पट्टहस्तिनः स्थानं साधूनां वसतिसमीप एवाऽऽसीत् । साधवस्त्वहिंसामेव सर्वस्वं गणयन्तः प्रतिपदं जीवदयां पालयन्तीति प्रत्यहं पश्यतो हस्तिनश्चित्तं जीवदययाऽहिंसया चैव भावितम् । अथैकदा केनचिद् वैरिणाऽऽपतिते युद्धे सैनिकास्तं पट्टगजं युद्धार्थं नीतवन्तः । रणाङ्गणे हि यदाऽरिभटास्तं शस्त्राघातेन पीडयन्ति स्म तदाऽपि सोऽहिंसाभावितचित्तत्वान्निष्प्रतीकारमेवाऽस्थात् । एतद् दृष्ट्वा राज्ञो महदाश्चर्यं जातम् । तेनैतत्कारणज्ञानार्थं पृष्टाः सर्वेऽपि । ततो ज्ञातं तेन यत्-सततं साधूनां समीपे वसनात् तस्येयं परिस्थितिरिति । अतस्तेन स्वसेवका आदिष्टा यत् 'कतिचिद् दिनान्ययं सैनिकानां शस्त्राभ्यासस्थले बध्यतां, तद्विलोकनेनाऽस्य मानसं परिवर्त्येत ।' एवं च कृते तस्य गजस्य हिंसा-रोषादिकाः संस्काराः पुनरपि जागृताः । ततो रणाङ्गणे नीतोऽसौ शत्रुसैन्यं बहुधा पीडयन् स्वपक्षस्य जयं कल्पितवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वेऽप्येते प्रसङ्गा ज्ञापयन्ति यद् - मनुष्यवत् पशु-पक्षिणामपि मानसं परिसरप्रभावाधीनमेव । किन्त्वेते सर्वेऽपि दृष्टान्ताः शास्त्रीया दन्तकथारूपा वा । अतो जनानां सर्वेषामपि कदाचिदत्र प्रत्ययो नाऽपि भवेत् । अतोऽत्रैदंयुगीनः प्रसङ्गोऽपि प्रस्तूयते ।

शास्त्रीयसङ्गीतेऽभिरुचिवतां खाँ साहेब-अब्दुलकरीम खाँ-महोदयस्य नाम ज्ञातचरमेव स्यात् । (जयन्तिलाल-झरीवाला-इत्यनेन तु तज्जीवनविषयकं - "Abdul Karim - The Man of the times" इति पुस्तकमपि लिखितमस्ति ।)

स हि विश्रुतायाः किराणा-परम्पराया(घराना) गायक आसीत् । शास्त्रीयसङ्गीतेन सहैव तस्य ठूमरी-पद्धतावपि पूर्णं प्रभुत्वमासीत् । ठूमरीपद्धतौ मनोरञ्जकाया अतीव मधुरायाश्च स्वरावलेः सङ्कलनं तेनैवाऽऽरब्धमासीत् । आत्यन्तिकेन दृढेन चाऽभ्यासेन (रियाज़) तेन स्वीयं कण्ठपीठमत्यन्तमधुरं मृदुतमं च कृतमासीत् । तस्य गानेन हि औदीच्या दाक्षिणात्याश्चाऽपि सङ्गीतज्ञाः श्रोतारश्च मुग्धीभवन्ति स्म । एतत्फलत्वेन नैके कार्यक्रमास्तस्य दक्षिणभारतीयनगरेषु सञ्जाताः । शिरडीवासि-**साँइबाबा**-नागपुरस्थ**सन्तताजुद्दीनबाबा**-इत्यादीनां सत्पुरुषाणां मनस्तोषणार्थं तेषां सन्निधौ तेन बहुदिनानि गीतमासीत् । एकदा च मैसूरुनगरस्थ-**सन्तकलन्दरहज़रत**-इत्यस्य समाधिस्थाने तेन सप्तदिनानि यावद् गीतम् । तदा गायतस्तस्य समीपे व्याघ्र एक आगतस्तं प्रदक्षिणीकृत्य च प्रत्यावृतः । एतद् दृष्ट्वा समाधिस्थलवास्तव्यफकीरेणोक्तं- 'भो ! हज़रतो भवति प्रसन्नोऽस्ति, अतो यथेच्छं किमपि मार्गयतु नाम ।' अनेनोक्तं - 'नाऽहं किमपीच्छामि, केवलं ममाऽन्त्यकाले मे मत्पार्श्ववर्तिजनानां च न किञ्चिद् दुःखं कष्टं वा भवेदित्ये-तदेवाऽभिलषामि । ततः प्रभृति यदा १९३७ तमे वर्षे पाण्डिचेरीनगरं प्रति श्रीअरविन्दमहोदयाय सङ्गीतश्रावणार्थं गच्छतस्तस्य मध्येमार्गमेवाऽवसानं जातं तावत् तस्य न काऽपि देहबाधा जाता नाऽप्यन्येषां किमपि कष्टं जातम् । देहान्तोऽपि तस्येच्छानुरूपमेव जातः ।

एतादृशस्य अब्दुलकरीम खाँ-महोदयस्य गृहे एकः टीपु-इत्यभिधो गृहशुनकः पालित आसीत् । खाँमहोदये विद्यार्थिनः सङ्गीतं शिक्षयति एषोऽपि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रैवोपविशति स्म । सङ्गीताभ्यासं श्रावं श्रावं गृहगमनानन्तरं प्रायः षण्मासाभ्यन्तर एव स सप्तकस्य द्वादशाऽपि स्वरानवगन्तुं स्वकण्ठेन गातुं च शिक्षितवान् । ततो गच्छता कालेन स क्रमशः पञ्च रागानालापयितुमपि शिक्षितवान् । कीदृशोऽयं सङ्गीतमयवातावरणस्य प्रभावो ननु, यत् श्वाऽपि शास्त्रीयसङ्गीतं गातुं प्रभवेत् ?

ततः स्वशुनकस्येदृशीं सिद्धिं दृष्ट्वा मुदितेन खाँमहोदयेन पुणे-सतारादिनगरेषु लोकसमक्षं तद्गानस्य कार्यक्रमा आयोजिताः । ततो मुम्बाइनगरेऽप्येकः कार्यक्रम आयोजितः । अस्मिन् कार्यक्रमे एनी बेसन्ट्, सरोजिनी नायडु, जमनादास-द्वारकादासबजाजः, होर्नी-मेन्, बॉम्बे-क्रोनिकल-पत्रिकायाः सम्पादको ब्रेल्-वी, मुम्बाइसमाचारपत्रिकायाः सम्पादकः सोराबजी-कापडिया-इत्यादयो महानुभावाः, क्रीडारङ्गना(CIRCUS)मायोजकाश्चोपस्थिता आसन् । तेषां सर्वेषामपि पश्यतां टीपुना सप्तकस्य द्वादशाऽपि स्वरा यथावद् गीताः । ततश्च तेन **शङ्करा, श्यामकल्याणः, मुलतानी, पुरिया-धनाश्रीः** तथा **पुरिया** इत्येतेषां पञ्चानामपि रागानामालापा अत्यन्तं मधुरतया गीताः । एतच्छ्रुत्वा च सर्वेऽपि श्रोतारः साश्चर्यानन्दमनुभूतवन्तः ।

एतेन ज्ञायते यत् पशवोऽपि कथङ्कारं ग्रहणशीलाः संवेदनशालिनश्च भवन्ति-इति । एवमेव पशु-पक्षिणामन्येऽपि केचित् प्रसङ्गाः सन्ति यत्र तैः स्वसंवेदनानि सुतरां प्रकटीकृतानि सन्ति । तान् प्रसङ्गान् ह्यागामिन्यां शाखायां वर्णयिष्यामः ।

[सौजन्यं - भारतीयविद्याभवनप्रकाशिता
**नवनीत-समर्पण**-इति गूर्जरमासपत्रिका]





Jain Education International For Private & Personal Use Only www.jainelibrary.org

आस्वादः

# वैदिककवयित्री विश्ववारा

डॉ. आचार्यरामकिशोरमिश्रः

विश्ववाराऽऽत्रेयगोत्रजा वैदिककवयित्री बभूव । साऽत्रिमहर्षिवंशे समुत्पन्ना । अत आत्रेयी सा कथ्यते । साऽग्निदेवस्योपासिकाऽऽसीत् । तयैकं सूक्तं लिखितं, यदृग्वेदे पञ्चमण्डले प्राप्यते, तदष्टविंशं(२८) सूक्तमस्ति । अस्मिन् सूक्ते तयाऽग्निर्वन्दितः । अग्निस्तुतिं कुर्वत्या तया प्रणीतं यदग्निदेव ! त्वमसि द्युतेर्ज्वालानां च स्वामी । यस्य यजमानस्य गृहं त्वं प्राप्नोषि, स पशुधनं प्राप्नोति । या स्त्री श्रद्धया त्वां प्रणमति, सा ऐश्वर्यशालिनी भवति । तस्या अन्तःकरणं पवित्रं मनश्च सुस्थिरं भवति । यथा-

समिध्यमानो अमृतस्य राजसि हविष्कृण्वन्तं सचसे स्वस्तये ।<br>
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः ॥

ऋग्वेदः ५/२८/२

अग्ने ! त्वं जलमध्ये प्रकाशसे ।<br>
सुखाय हविर्ददानं त्वं सम्बध्नासि ।<br>
सम्पूर्णं यशोधनं वा धारयसि ।

तया विश्ववारयाऽग्निं वर्णयन्त्या स्वलेखनी ततोऽग्रे सरिता । यथा-

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।<br>
सं जास्पत्यं सुयमा मा कृणुव शत्रूयतामभि तिष्ठा महांसि ॥

ऋग्वेदः ५/२८/३

हे शर्ध = बलवन् ! अग्ने ! तव द्युम्नानि = द्युतयो महते सौभाग्याय



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति । जास्पत्यं = दाम्पत्यं दृढं कुरु । शत्रून् प्रत्याक्रमणं कुरु । त्वं महान् असि । तयाऽग्रे पुनर्लिखितम् । यथा-

समद्धिस्य प्रमहसोऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नावाँ असि समध्वरेष्विध्यसे ॥ ऋग्वेदः- ५/२८/४

अग्ने ! त्वं यशस्वी बलवानसि । यज्ञेषु प्रकाशसे । महतः प्रकाशितस्य तव श्रियमहं वन्दे । अस्या विश्ववारायाः सूक्ते षट्(६) ऋचः सन्ति । तया सूक्ते लिखितं यदग्निरीश्वरस्यैव-स्वरूपमस्ति । अस्या ऋग्भिरग्निपूजया सर्वैरीश्वर-पूजनशिक्षा ग्रहीतव्या ॥

२९५/१४, पट्टीरामपुरम्,
खेकड़ा (बागपत) उ.प्र. २५०१०१

द्वाविमौ पुरुषौ लोके
न भूतौ न भविष्यतः ।
प्रार्थितं यश्च कुरुते
यश्च नाऽर्थयते परम् ॥
[समयोचितपद्यमालिका]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्रम्

## नमो नमः श्रीगुरुनेमिसूरये ॥

मुनिधर्मकीर्तिविजयः

आत्मीयबन्धो ! चेतन !

धर्मलाभोऽस्तु ।

तव कुशलं कामये । अस्माकं विहारयात्रा ससुखं वर्तते ।

"आत्माऽनन्तशक्तेः स्वाम्यस्ति । स यत्किमपि कर्तुं शक्त" इति बहुशः श्रुतं पठितं चाऽपि मया । भगवतां महापुरुषाणां च जीवनदर्शनेनाऽप्येतज्ज्ञातम् । किन्तु वराका दुर्बलाश्च वयमेतद्वचनं स्वीकर्तुं न सन्नद्धा भवामस्तथाऽप्येतत्कथनं वास्तविकं सत्यं चाऽस्ति ।

"अनादिकालादेष संसारो विद्यमानोऽस्ति, अनन्तकालपर्यन्तं च स्थास्यति" इति शाश्वतनियमोऽस्ति । तथाऽपि यदि जीवो देहस्याऽऽसक्तिं मोहं च विहायाऽऽत्मोत्थानार्थं प्रयत्नं कुर्यात्तर्हि तत्तत्व्यक्तिमाश्रित्य संसारनाशो भवत्येव । यावत्यासक्तिः सेवा च देहस्य विधीयते ततोऽल्पाऽपि सेवाऽऽसक्तिश्चाऽऽत्मोन्नत्यर्थं क्रियेत जीवेन तर्हि जन्म जन्मान्तरं च सफलीभवेदेव । किन्तु हन्त ! अस्माभिर्देह एव सर्वस्वं प्रधानं चेति मत्वाऽहर्निशमात्मोत्थानमार्गमुपेक्ष्य केवलं देहस्योत्थानाय संवर्धनाय चैव प्रयत्नः क्रियते । भक्षणं स्वपनं चलनं स्नानं वस्त्रपरिधानं व्यापारकरणं च, एवं धर्मक्रियेति सर्वास्वपि क्रियासु देहस्यैव प्राधान्यं दरीदृश्यते । 'देहाय यद् रोचते तदेव करणीयं, देहस्य यत् प्रतिकूलं तन्न करणीय'मिति सङ्कल्पोऽस्त्यस्माकम् । अद्य विश्वस्मिन् विश्वे प्रतिदिनं नवीनानां बहूनामद्यतनसाधनानां प्रादुर्भावो भवति । कथम् ? जीवनं सरलं सुखदं च भवेत्तथा न कदाऽल्पमपि कष्टं स्यादित्येकमेव कारणमस्त्यत्र । एवमेतेषां सर्वेषां साधनानां जननी देहस्याऽऽसक्तिरेवाऽस्ति ।

देहस्यैषाऽऽसक्तिरस्माकं सहिष्णुतां नाशयति । सा जनानसहिष्णून् पराधीनान् च करोति । वयं नितरां देहस्य पराधीनाः स्मः । तत एव देहस्याऽल्पामपि प्रतिकूलतां सोढुं न समर्था वयम् । अद्य यदि किञ्चित्कालमेव विद्युद् गता स्यात्तर्हि जना व्याकुला दुःखिनश्च भवन्ति । तेषां चित्ते व्यजनं विना घर्म कथं सहिष्यते ? जलोन्नयनयन्त्रं वस्त्रप्रक्षालनयन्त्रं (Washing Machine) शीतक(Refrigerater)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुन्नयनी (Lift) च कथं चलिष्यन्ति ? दूरदर्शनं विना कथं समयो व्यतीतः स्यात्? यद्येवं भवेत्तदा दुग्धं फलं शाकं चेत्यादि क आनयेत् ? इति चिन्तया व्याकुलस्य जनस्य स्वास्थ्यमपि प्रतिकूलं दुर्बलं च स्यात् ? न कस्मिन्नपि कार्ये मनो व्यापृतं स्यात्। एतत्त्वेकस्यैव साधनस्य पराधीनता दर्शिता। एवं वयं प्रतिदिनं कियतीं वेलां व्याकुला भवामः।

पूर्वस्मिन् काले विद्युद् नाऽऽसीत्, न चैतादृशान्यद्यतनानि साधनान्यासन्। तथाऽप्यस्माकं पूर्वजास्तु ससुखं सानन्दं च जीवन्ति स्म। एकाक्येव स्त्री गोदोहनं गृहकार्यं पाचनं वस्त्रादिप्रक्षालनं जलानयनं कृषिकार्यं चेति सर्वमपि कार्यं करोति स्म। तथाऽपि सा प्रसन्ना स्वस्था चाऽऽसीत्। अद्य सर्वेष्वप्यद्यतनेषु तेषु साधनेष्वुपलभ्येषु सत्स्वपि तथैकस्मिन्नपि गृहे पञ्चषेषु कर्मकरेषु सत्स्वपि जना दीना अप्रसन्ना अस्वस्थाश्च भवन्ति। अद्यतनकालीनो मनुष्यो न विभिन्नानामृतूनां प्रभावं सोढुं समर्थोऽस्ति, तस्य सहिष्णुतैव नष्टा। एतदसहिष्णुतावशेन वयं प्रतिपदं दीनतां व्याकुलतां च प्राप्नुमः। एवं शनैः शनैरसहिष्णुतायाः संस्कारा दृढीभवन्ति। दृढीभूता एते संस्कारा अस्मान् नितरां पराधीनान् दीनांश्च कुर्वन्ति।

बन्धो! देहस्य सौन्दर्ये संवर्धने चैव विलग्ना मूढाश्च वयं देहस्याऽनन्तशक्तिं न जानीमः। सा शक्तिः केवलिगम्याऽस्ति, तज्ज्ञातुं वयं न शक्ताः। तथाऽपि विश्वस्मिन् विश्वे यदद्यतनयन्त्रविज्ञानं तथा यान्यद्यतनसाधनानि चोपलब्धानि दृश्यन्ते तन्निरीक्ष्य निश्चितं मन्येऽहं 'मनुष्योऽनन्तशक्तेरधिपतिरस्ति।' यत एतेषां साधनानां जनको न कोऽप्यन्यः किन्त्वेष मनुष्य एव। देहे स्थितानां शक्तीनामुचितो-पयोगोऽस्माभिर्न क्रियते, अन्यथैतेनैव देहद्वारेण यत्किमपि कर्तुमवाप्तुं च शक्यते। एष एव देहो यथा भौतिकसुखस्य कारणं तथैवाऽऽत्मिकसुखस्याऽपि निदानमस्ति। यद्यात्मिकसुखमिच्छेस्तर्हि देहस्याऽऽसक्तिं त्वं त्यज। "यदि देहस्याऽऽसक्तिः कृता तर्ह्यधःपतनं, किन्तु देहेऽनासक्तभावः, आत्मा देहाद् भिन्नः, यत् किमपि भवति तद्देहे भवति न त्वात्मनि" चेति मनसि भाव्येत तर्ह्यात्मोत्थानं निश्चितम्।

भगवन्तं महावीरं बुद्धं रामं कृष्णं च स्मर। तेऽप्यस्मादृशा एव पार्थिवदेह-धारिण आसन्। तथाऽप्येतस्या देहशक्त्याः सदुपयोगेनैवाऽऽत्मोत्थानं साधितं तैर्महापुरुषैः। प्रभुमहावीरः स्मृतिपथमागच्छति। एतेन भगवता षण्मासपर्यन्त-मुपोषितम्। जलमपि नैव पीतम्। न च भूमौ आसीनः, किन्तु कायोत्सर्गध्याने एवोदतिष्ठत् सः श्रीमहावीरः। एकस्यां निश्येव दुस्सहा विंशतिरुपसर्गाः सोढाः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य दृष्टिमात्रेणैव जना म्रियन्ते तेन चण्डकौशिकनाम्ना दृष्टिविषसर्पेण त्रीन् वारान् स महावीरो दष्टः । एवमनेके उपसर्गाः सोढाः, तथाऽपि स प्रभुर्विचलितो न बभूव, न च तेन मनसाऽपि दुर्ध्यानं कृतम् । एषा शक्तिः कुत आगता ? तस्या यो देह आसीत् स एवौदारिकदेहोऽस्माकमप्यस्ति । भो ! यावती देहस्याऽऽसक्तिः प्रबला मोहश्च बलिष्ठस्तावती देहस्य पीडाऽधिका, तथा देहस्याऽनन्तशक्तेर्यथार्थ उपयोगोऽशक्योऽस्ति । योऽस्य देहस्याऽऽनन्तशक्त्या उपयोगः कथं करणीय इति जानाति तस्य कृते न किमप्यशक्यमस्ति । हिमालयगिरेर्गुहायां निवसन्तो योगिनो हठयोगेन बहुदिवसपर्यन्तं न किमप्यदन्ति, तथा दीर्घकालं श्वासोच्छ्वासमपि निरुन्धन्ति, इत्यस्माभिः श्रुतमस्ति । यद्येते योगिनोऽप्येतत्कर्तुं समर्थास्तर्हि त्रिलोकस्याऽधिपतेः का वार्ता ?

बन्धो ! एतद्देहमनन्तशक्तेरधिष्ठानमस्ति । अस्मिन् देहे लौकिका लोकोत्तरा चेति द्विधा शक्तिर्विद्यते । अद्य जगति चुम्बकीय-वर्ण-एक्युपङ्क्चर-एक्युप्रेसर-स्फटिक-सुजोक-रेकी-इत्यादीनां बह्वीनां चिकित्सापद्धतीनां विकासो दृश्यते । एतच्छक्तिप्रभावात् कर्क(Cancer)रोगादीन् सर्वानपि रोगान् नाशयितुं शक्यमस्ति । एवं लौकिकशक्तिप्रभावेण भौतिकलाभाः प्राप्यन्ते । तथा लोकोत्तरशक्तिश्चित्ते प्रवर्तमानान् दुर्भावानशुभाशयान् चाऽपाकृत्य शुभभावानात्मिकगुणान् च प्रकटीकरोति । महावीरप्रभुणैतस्या लोकोत्तरशक्त्या माहात्म्येनैवैतादृशमचिन्त्यं सामर्थ्यमवाप्तम् ।

महावीरभगवतोक्तम्-देहो नौर्जीवश्च नाविकोऽस्ति । जीवेनैतद्देहरूपस्य नावः साहाय्येन संसाररूपो भवसमुद्रस्तरणीयोऽस्ति । उपनिषदि व्याकृतं च- देहस्तु रथो जीवश्च रथिकः, देहस्तुरङ्गमो जीवश्च स्वाम्यस्ति । एवं देहस्तु भवसमुद्रतरणाय सेतुरिवाऽस्ति । आत्मना देहस्याऽऽलम्बनेन परमात्मा परमगुणाश्च प्रापणीयाः । देहः साधनं साध्यं त्वात्मगुणाः सिद्धिश्चाऽस्ति, किन्त्वद्याऽस्माभिर्देह एव साध्यतया परिगणितः, तत एव परमात्मतोऽप्यधिका पूजाऽस्य देहस्य क्रियते । निरन्तरं देहस्यैवाऽऽसक्तौ वयं रममाणाः स्मः । अद्यावधि ये ये सङ्ग्रामा जातास्तेषां मूले देहस्याऽऽसक्तिरेवाऽस्ति । लङ्केशः सीताया देहे आसक्तो जातस्तत एव भयङ्करं युद्धं जातम् । वृत्तपत्रिकायां प्रतिदिनं पठ्यतेऽस्माभिर्यदस्मिन् ग्रामे वधो जातो बलात्कारश्च कृत इत्यादि । अत्राऽपि देहासक्तिरेव कारणमस्ति । प्रारम्भे देहासक्त्या भवदहितमल्पं दृश्यते किन्तु परिणामस्त्वतीव भयङ्करो भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीविनोबाजी आह-आदौ देहं प्रत्यासक्तिर्जायते, पश्चात्तत्र ये येऽनुकूला भवन्ति तान् प्रत्यासक्तिर्भवति । एवमनुकूलानां जनानामेकः समुदायो जायते, एवं शनैः शनैः स्नेहिजनान् कौटुम्बिकजनान् समाजसभ्यान् देशवासिनश्च प्रत्यासक्तिर्जायते । तेषां हितार्थं यत्किमपि क्रियतेऽस्माभिः । तत्र ये ये विपरीता भवन्ति, तेषामहितकरणेऽपि सन्नद्धा भवामो वयम् । एवं देहासक्तिरेवाऽनर्थानां मूलमस्ति ।

कृतघ्नस्याऽस्य देहस्याऽऽसक्तिः कथं करणीया ? देहस्याऽस्य कृते किं किं न कृतम् ? अन्तिमवर्षेषु सुखेन जीवेयमिति देहसुखस्याऽऽशया प्रातःकालादारभ्य रात्रिपर्यन्तं धनार्थमितस्ततो जीवोऽटितः, स्नेहिजना विहिताः, देहे काचिदेव पीडा जाता तदा तत्क्षणमेव सर्वमपि विहाय देहस्य लालनं पालनं च कृतं, धर्मोऽपि त्यक्तः, तथाऽप्यन्तिमकाले तु स देह कृतघ्न एव भवति ।

महामहोपाध्यायश्रीविनयविजयगणिना गदितं-

कर्पूरादिभिरर्चितोऽपि लशुनो नो गाहते सौरभं
नाजन्मोपकृतोऽपि हन्त पिशुनः सौजन्यमालम्बते ।
देहोऽप्येष तथा जहाति न नृणां स्वाभाविकीं विस्रतां
नाभ्यक्तोऽपि विभूषितोऽपि बहुधा पुष्टोऽपि विश्वस्यते ॥

(शान्तसुधारसकाव्यम्)

यथा कर्पूर-चन्दन-विशिष्टसुगन्धिद्रव्यादिभिर्लशुनस्य दुर्गन्धमपाकर्तुं बहवः प्रयत्नाः क्रियन्ते तथाऽपि तेन न त्यज्यते दुर्गन्धः, आपत्तिकाले दुर्जनः सज्जनेन रक्ष्यते तथाऽपि तेन दुर्जनता न त्यज्यते, तथैव जीवेनाऽस्य देहस्य रक्षणार्थमनेके प्रयत्ना विधीयन्ते तथाऽपि स देहोऽन्ते तु भस्मैव भविष्यति । एवं कृतघ्नस्याऽस्य देहस्य कृते कथमेतादृश्युन्मत्तताऽऽचरणीया ?

बन्धो ! देहस्य रक्षणं न करणीयं, देहः संसारवर्धकः, सर्वथाऽनर्थकारणं चेति न चिन्तनीयम् । अस्य देहस्याऽपि रक्षणं संवर्धनं सम्मार्जनं चेति सर्वमप्यवश्यं करणीयं यतोऽस्य देहस्याऽऽलम्बनेनैवाऽऽत्मोत्थानं करणीयमस्ति । किन्त्वस्य रक्षणमेव जीवनस्य सारः, रक्षणे एव सदा प्रयतितव्यमिति न चिन्तनीयम् । आत्मोत्थानमेव लक्ष्यमस्तीति न कदाऽपि विस्मरणीयम् । यद्येतल्लक्ष्यं विस्मर्यते तर्हि देहे आसक्तानां मूढानां चाऽस्माकं पशूनां च मध्ये को भेदः ? पशवोऽपि देहस्य संवर्धने संरक्षणे चैव लीना भवन्ति, तथैव त्वमपि देहे एवाऽऽसक्तोऽसि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाश्वतं सुखं विहाय क्षणिके देहसुखे एव मूढो जातः । एतस्मादासक्तिवशात् त्वयाऽऽत्मभानमेव विस्मृतमस्ति । आत्मा तु विशुद्ध एव, किन्तु ज्ञानादिमय-शुद्धस्वरूपमयात्मन उपरि ममत्वस्याऽऽवरणं संलग्नम् । यदैतदावरणमपास्तं भवेत्तदैव जीवने शान्तिः प्रसन्नता चाऽनुभविष्यसि । अतो देहासक्तिं विहायाऽऽत्मदर्शनं कुरु, इत्याशासे ।

## लेखकेषु वाचकेषु च सूचना

१. सुरुचिपूर्णं शिष्टं च गद्यं वा पद्यं वा सर्वमपि साहित्यं स्वीक्रियते प्रकाशनार्थम् ।

२. पत्रस्यैकस्मिन्नेव पार्श्वे शिरोरेखामण्डितं स्पष्टं च लिखित्वा प्रेषणीयम् ।

३. Xerox प्रतयो नैव परिशील्यन्ते । (Computer prints स्वीक्रियन्ते ।)

४. अन्यत्र सामयिके प्रकाशितं प्रकाश्यमानं वा साहित्यं न प्रेषणीयम् ।

५. वाचकैरपि स्वसङ्केतपरावर्तनेऽवश्यं ज्ञापनीया वयं येन सामयिकप्रेषणे सौकर्यं स्यात् ।

६. प्रतिभावानामपि केवलं प्रशंसायामेव तात्पर्यं न स्यात् किन्तु वस्तुनिष्ठः प्रतिभावो भवतु ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ललितकथा

# चाटुचर्याचमत्काराः

देवर्षिकलानाथ शास्त्री

नवक्रीतं चतुश्चक्रयानं (फोर-व्हीलर इति प्रायशोऽभिहितं कार्‌यानं) प्रचालयन्नहं गृहोपयोगिवस्तूनां क्रयार्थं मत्पत्नीं विपणिं प्रति नीतवानभूवम् । परावर्तमानेन मया चिन्तितं, "किमिति मध्येमार्गं स्थिते भव्येशस्य गृहे क्षणद्वयाय यानादवतीर्य, सायङ्कालीनोष्णपेय(चाय)चषकस्य सकृदास्वादनं न क्रियेत ? अनेन हि मम, मत्पत्न्याश्च क्रयकर्मणि (शॉपिंग) यः श्रमोऽभूत्तस्याऽपनोदनमपि भवेत्, मत्पत्नी भव्येशपत्नीं क्रीतानि वस्तूनि प्रदर्शयेत्, येन हि तस्या अपि कृतकृत्यताबोधः कश्चिदुदियात्" सर्वमिदं विचिन्त्य मया कार्‌यानं भव्येशगृहस्याऽन्तर्नीतं किन्तु भव्येशो गृहे तिष्ठति न वेति जिज्ञासितुं, विनैव कुञ्चीकरणं (लॉकिंग), केवलं कार्‌यानस्य द्वारं पिधायाऽऽवामन्तः प्रविष्टौ । तत्र हि यद् मित्रगोष्ठीदृश्यं प्रत्यक्षीकृतं तेन द्विगुणितोत्साहावावां तूर्णमेव समनोयोगं तत्रोपस्थितैः सुहृद्भिस्तत्परिवारैश्च सह विनोदालापव्यापृता-वभवाव ।

तदानीं हि भव्येशस्य गृहेऽस्मान्मित्रं कविवर्यश्चातकोऽपि सपरिवारमुपस्थितोऽभूत् । मद्गृहात्नाऽतिदूरमेव भव्येशस्य गृहं, निकट एव च चातकस्य गृहमस्ति । अतः प्रायो वयं सर्वे सायंसमयविहाराय परस्परगृहानाश्रयाम एव । किन्त्वद्य भव्येशश्चातकश्च पृथक् कक्षे स्थितौ किञ्चन लेखनकृत्यं कुर्वाणौ दृष्टौ, तत्परिवारजनाश्च पृष्ठस्थिते शाद्वले (लॉन इत्याख्ये) वार्तालापनिमग्ना अदृश्यन्त । किं खलु विलिख्यते दत्तचित्तेन भव्येशेन यत्र चातकस्य सावधानः परामर्शोऽपि तेन गृह्यमाणोऽस्तीति सकुतूहलं पृष्टं मया । तदा सेयं गोपनीया सूचना समुदतरद् यदागामिनि विश्वविद्यालयवार्षिकोत्सवेऽन्येन कार्यजातेन सहाऽस्माकं राज्यस्य नवप्रतिष्ठापितायां मन्त्रिपरिषदि शिक्षामन्त्रिपदे नियोजितस्य माननीयस्य महापुरुषस्याऽभिनन्दनमपि करिष्यते, तदर्थं च सुचिन्तिते संस्कृतगद्ये पद्येषु चाऽपि तस्याऽभिनन्दनपत्रं भव्येशेन प्रणीयमानमस्ति यत्र मन्त्रिप्रशस्तौ काव्यरचना कविप्रवरेण चातकेन क्रियमाणाऽस्ति यतो हि साऽप्यभिनन्दनपत्रे मुद्रयिष्यते । मन्त्रिणः स्वागताय काचन संस्कृतनिबद्धा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वागतगीतिरपि छात्राभिः प्रस्तोष्यते । साऽपि चातकेनैव प्रणीयमानाऽस्ति ।

सर्वमिदं विज्ञाय मया पृष्टं यद् यद्येतावत् सुमहत् कार्यजातं चिकीर्षितमस्ति तर्हि केवलं द्वावेव लेखकौ कथं सर्वस्याऽस्य कार्यस्य सम्पादनाय पर्याप्तौ मन्येते ? एतत्कृते स्वयं प्रधानाचार्यः, कुलपतिः, अन्ये च विविधशास्त्रनिष्णाता विद्वांस उपस्थाय शिक्षामन्त्रिणोऽभिनन्दनपत्रमालिखेयुरित्यपेक्ष्यते । अतो विदुषां किञ्चन दलमिदं कार्यं करोति चेत् साधीयः स्यात् । एतदुपरि भव्येशेन यत् सूचितं तच्छ्रुत्वा त्वहमपि विनोदस्य कुतूहलस्य, लज्जाया, वैलक्ष्यस्य च भावशबलतायां निमग्नमात्मानमन्वभवम् । स सूचितवान् यत् 'प्रथमं तु कुलपतिर्विदुषां दलमेकं कार्यस्याऽस्य कृते नियोजयितुमैच्छत् किन्तु तदानीं राज्यप्रशासनस्य शिक्षासचिवोऽप्युपस्थितोऽभूत् । तेन कथितं यत् ''संस्कृतभाषायां प्रशस्तिपाठस्य, स्तुतिपरम्परायाः, स्तोत्ररचनायाः, अभिनन्दनपत्रप्रणयनस्य च सुदीर्घ इतिहासो जागर्ति । संस्कृतविभागस्य कश्चनैकोऽपि सुधीः सर्वमिदं कर्तुं समर्थः स्यात् । संस्कृतज्ञा अद्यत्वे सत्ताधारिणां प्रसादनस्य सर्वविधामपि सामग्रीं साधुसविधेऽधिकुर्वन्तीति ममाऽनुभवः । अत एव त्विदमभिनन्दनपत्रं हिन्दीभाषायाम्, आङ्ग्लभाषायां वा न प्रणीयते, केवलं संस्कृतेऽभिनन्दनपत्रं समर्पयिष्यते ।'' शिक्षासचिवस्येमं परामर्शमधिगत्य कुलपतिना त्वरितमेव निर्णीतं यत् कश्चनाऽप्येकः संस्कृतविभागीय आचार्यः, द्वौ वा, तदिदं कार्यमनायासमेव कर्तुं क्षमिष्यते । अत एव भव्येश-चातकौ नियोजितावस्मिन् कार्ये ।'

तदिदं विज्ञाय सर्वप्रथमं तु मम मनसे कश्चनाऽऽक्रोश उदभूत् । किमिति शिक्षासचिवः संस्कृते प्रशस्तिपाठस्य परम्परामनुस्मरन् संस्कृतज्ञानेव सत्ताधारिणां जयघोषाय, अभिनन्दनाय, प्रशंसनाय च नियोजयति ? अथ खलु कोऽस्ति तादृशः शिक्षकः, आचार्यो, वैज्ञानिको, लेखको वा यः सत्ताधारिणामुच्चपदासीनानां च प्रशंसायां पश्चात्पदो भवेत् ? अन्यासु भाषासु किं न वर्तते तादृश इतिहासः, तादृशं साहित्यम्, तादृशी परम्परा ? एतादृशमाक्रोशं यावदहं पूर्णतयाऽभिव्यनज्मि तत्पूर्वमेव भाषाशास्त्रिणा भव्येशेन स्वकीयं भाषाज्ञानं प्रकटितम् - ''अरे, तत्तु वयं सर्वे जानीम एव । सत्ताधारिणां, सामन्तानामुच्चपदस्थानां वा स्तुतिगानस्य परम्परा सर्वेषु देशेष्वस्ति । तत्कृते सर्वास्वपि भाषासु बहवः शब्दा अपि सुविदिताः । अस्माकं संस्कृते तु सूर्याग्निप्रभृतीनामिन्द्रवरुणादिप्रभृतीनां च देवानामेव स्तुतयः, स्तोत्राणि, सूक्तानि वा प्रशस्तिपराणि वेदेष्वाख्यातानि किन्त्वन्यासु भाषासु तु सम्राजां, सत्ताधारिणां च प्रशस्तयो विविधैर्विधिभिर्गीयन्ते स्म । तासां कृते सर्वासु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाषास्वभिधानान्यपि विद्यन्ते यथा ग्रीकभाषायां 'पैनिजीरिक (Panegyric)पदेन, लेटिनभाषायां यूलोजी (Eulogy)पदेन प्रशस्तिः स्तुतिर्वाऽभिधीयते, द्वयमपीद-मांग्लभाषायामपि परिगृहीतम्। तत्र प्रशस्तिः 'प्रेज़' (Praise) पदेनाऽप्यभि-धीयते।"

शास्त्रप्रवचनस्याऽस्य मध्य एव चातकेनोदीरितम् - "अरे बन्धो! स्तुतयः, प्रशस्तयः, स्तोत्राणि च धर्मस्याऽङ्गभूतानि भवेयुरेव सर्वासु भाषासु। तादृश्योऽवितथा, यथार्थाश्च प्रशंसोक्तयो गुणानुवादा इत्याख्यायन्ते। भगवतो गुणानुवादानुरणनं भक्तस्य परमं कर्तव्यं भवत्येव। अत एव भक्त्यान्दोलनप्रवृत्तेरनन्तरं सर्वविधा अपि भक्ताः स्वकीयस्याऽऽराध्यस्य स्तुतये सहस्रशः पद्यानि प्रत्यहमुच्चारयन्ति स्म। "विष्णु-सहस्रनाम"प्रभृतिषु भगवतो गुणानुस्मरणाय सहस्रशो नामानि तस्योच्चर्यन्ते स्म। परस्तात्तु 'स्तुतिमुक्तावली' 'लक्ष्मी-सहस्रम्' इत्यादिनामभिर्यानि सुप्रथितानि शिवस्य लक्ष्म्या वा गुणस्मरणाय सहस्राधिकेषु पदेषु स्तात्रोणि व्यलिख्यन्त कविभिस्तेषु याः प्रशस्तयोऽन्तर्गर्भितास्ता यथार्था अवितथाश्चैवाऽमन्यन्त, न तत्र मिथ्याप्रशंसलेशोऽपि केनचन दृष्टः। आचार्याणां महाधीशानां च स्तुतौ केवलं श्रीपदप्रयोगेन न तुष्यन्तश्चाटुकाराः श्री१०८, श्री१००८ इत्यादि यल्लिखन्ति स्म, तदवश्यं चाटुत्वेन परिभाषितुं शक्यते।"

एतदुपरि मया स्पष्टीकृतं यद् "वेदादिषु तत्तद्गुणविवेचकैः सूक्तैर्याः स्तुतयो विधीयन्ते स्म, भक्तैर्वा स्वाराध्यस्य ये गुणानुवादाः क्रियन्ते स्म, न तत्र कस्याऽप्याक्षेप आपत्तिर्वा सम्भवति। एवंविधाः स्तुतय एव पैनिजीरिक, यूलोजी, प्रेज़-इत्यादि पदवाच्या भवन्ति स्म, ता देवेभ्योऽपि समर्प्यन्ते स्म, परस्तात् सम्राड्भ्यो, राजभ्यः, सत्ताधारिभ्यश्चापि तासां समर्पणमारब्धम्। तदनु तत्र केवलं गुणानुवादो न भवति स्म, स्वार्थपूर्तये, तेषां प्रसादनाय, मिथ्यास्तुतयः, अतिशयोक्तिपूर्णं गुणवर्णनम्, असत्स्वपि गुणेषु तेषामुद्भावकं कृत्वा स्वामिनं प्रसाद्य, स्वहितपूर्तिमात्रोद्देश्यकाः प्रसादनप्रयासाः क्रियन्ते स्म। ते एव गर्हणीयतां भजन्ति स्म, न खलु..." मया वाक्यपूर्तिः क्रियेत तत्पूर्वमेव मत्पत्नी, या कतिपयेभ्यः क्षणेभ्यः कक्षान्तः प्रविश्या-ऽस्माकं संलापं शृण्वन्त्यभूत्, स्पष्टीकृतवती - "मान्याः, भवन्तस्तु जानाना एव स्युर्यदेतादृशाः स्वार्थपूरणोद्देश्यकाः प्रयासा गुणानुवादाश्च न खलु प्रशस्तिपदेन व्यपदिश्यन्ते, न वा स्तुतिपदेन, ते खलु स्मर्यन्ते चाटुकारतापदेन, चाटूक्तिपदेन वा। सुमहदन्तरं स्तवने, प्रशंसने, अभिनन्दने वा, अपरतश्च चाटुकारतायां बन्दिवत् चाटुपटुत्वे च। चाटुकारिताया इयं परम्परा सर्वेषु देशेषु सर्वासु भाषासु चाऽनादिकालादेव



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्यमानाऽऽसीदित्यपि जानन्त्येव भवन्तः। इयं चटुकारता चाटुकारिता वा उर्दूभाषायां खुशामद अथवा चापलूसी इत्याख्यायते, हिन्द्यां भटैती, चिरौरी, ठकुरसुहाती इति, आंग्लभाषायां फ्लैटरी इति।''

तदैव भव्येशेन भाषाविज्ञता प्रदर्शिता ''आम्, प्रजावति, जानीमो वयम्। इयं परम्पराऽन्यासु भाषास्वधिकं बद्धमूला इत्यपि प्रतीयते। आंग्लभाषायां हि फ्लैटरी-पदस्य पर्याया अन्येऽपि तादृशाः सन्ति येषां रसप्रवाहो हिन्दीभाषिभिरपि स्वदेशे स्वसमाजे चाऽऽनायितः। चाटुभाषणस्य 'फ्लैटर'करणस्य क्रिया तत्र 'बटर अप' (butter-up) इति शब्देनाऽप्यभिधीयते यस्याऽनुवादो हिन्द्यां 'मक्खन लगाना', मुंबई इत्यादिक्षेत्रेषु 'मसका लगाना' इत्यादिभिः पदैः क्रियते। संस्कृतीकरणमप्यस्य कतिपयैः कृतमभूत् 'नवनीतलेपनम्' इति।

मयोक्तं यद् ''अस्या अभिव्यक्तेर्मूलमियं परम्परा भवेद् यद् यदा कश्चन महान् पुरुषः प्रसादनीयो भवेत् तदा प्रातराशं कुर्वाणाय तस्मै पुरोडाशे अर्थाद् रोटिकाया ब्रेड (bread) इत्याख्यायाः फलके स्लाइस (slice) इत्याख्ये कश्चन चाटुकारो नवनीतं हैयङ्गवीनं वा बटर (butter) इत्याख्यं विलेपयेत्, येनाऽयं प्रसन्नो भवेत्। इयमेव क्रिया 'बटर अप' करणस्य क्रिया 'मक्खन लगाना' इत्याख्या क्रिया नवनीतलेपनरूपेण प्रथिता पद्धतिर्वा सञ्जाता स्यात्।'' सर्वमिदं निशम्य सर्वैः सुहृद्भिस्तदिदं तु विनिश्चितं यत् प्रशस्तिगाने चाटुकारितायां च समुहदन्तरमस्ति किन्तु सर्वैरिदमपि सर्वसम्मत्याऽङ्गीकृतं यदस्मिन् युगे सेयं चाटुकारितैव साम्राज्ञीवत् सर्वत्र विजृम्भते, स्तुतयः प्रशस्तयो वा वैरल्यं भजन्ति।

तदैव चायचषकाण्यादाय सर्वेषां सुहृदां गृहस्वामिन्योऽपि कक्षेऽस्मिन् प्राविशन्। अस्मभ्यं चायचषकान् प्रदाय सकौतूहलं ता अपि प्रष्टुमारभन्त ''कीदृशः प्रसङ्गोऽभूदयं सुहृत्संलापस्ये''ति। यदाऽस्माभिः सूचितं यद् ''मन्त्रिमहोदयस्याऽभि-नन्दनपत्रं निर्माणाधीनं वर्तते तदुपरि च चाटुपटुत्वाक्षेपः क्रियते'', तदा ताः सपरिहासं प्रोक्तवत्यो यद् ''एतादृशान्याभिनन्दनानि तु सर्वदैव सम्राजां, राज्ञां शासकानां च कृते प्रस्तूयन्ते स्म। पण्डितराजोऽपि प्रोक्तवान् 'दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः' इति''। चातकेनैतदुपरि कथितं यत् ''सर्वमिदं वयं पाठयाम एव काव्यशास्त्रग्रन्थेषु राजप्रशस्तिप्रसङ्गे उदाहरणविधया। ध्वनिकार-मम्मटादिभिर-प्युदाहृता एवंविधा राजस्तुतयः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न श्रान्ताऽसि तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिमां प्रस्तौमि यावद्भुव-
स्तावद् बिभ्रदिमां स्मृतस्तव भुजो, वाचस्ततो मुद्रिताः।'

पृथिव्याः स्तुतिं कुर्वाणः कविरत्युक्तिविधया ब्रूते यत् सर्वामेमां वसुधां धारयन् सम्राजो बाहुर्भूमेरपि बलवत्तरः।'' भव्येशेनाऽपि प्रोक्तं यद् -

''देवत्वमेव पातालमाशानां त्वं निबन्धनम्।
त्वं चाऽमरमरुद्भूमिरेको लोकत्रयात्मकः॥

इत्यत्र तु राजा त्रैलोक्यरूपकेणोपमितः।'' मयाऽपि स्मृतं यत् 'प्रतापिनो राजानः सर्वदेवमया व्यपदिश्यन्त-

''यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वदेवमयो हि सः॥'' इति हि राजप्रशस्तिः'।

यदा प्राज्ञोऽपि राज्ञां स्तुतावतिशयोक्तीरकुर्वन्, किमस्माभिरपराध्यते यद् वयं मन्त्रिमहोदयानामभिनन्दनपत्राणि लिखामः ?

इत्थं खलु शास्त्रार्थस्याऽस्य यथैव समापनं निकटागतमदृश्यत तथैव मत्पत्न्या हस्तक्षेपं कुर्वाणया सर्वोऽपि शास्त्रार्थविषयो विपरिवर्तितः। तारस्वरेण ब्रुवाणया तया घोषितं 'मान्याः, मा त्वरयन्तु भवन्तः स्वनिर्णयमेवम्। राजस्तुतौ, मन्त्रिस्तुतौ च यत् सुमहदन्तरं तद् भवन्तः पश्यन्त्येव नेति महत् खेदास्पदम्। राजा खलु पृथ्वीपालको भवति स्म, स च मृत्युपर्यन्तं पृथ्वीपालनं कुरुते स्म। अतस्तस्य स्तुतिर्न मृषाभूता, न वितथा भवति स्म। न तत्र मिथ्यात्वं दृश्यते स्म। किन्त्वद्य तु जनतन्त्रपद्धतौ प्रजाभिः प्रत्येकं पञ्चमे वर्षे, बहुधा तु तत्पूर्वमपि, लोकतान्त्रिकप्रजाराज्योद्देश्यकं महानिर्वाचनं विधाय मन्त्रिणो निर्मीयन्तेऽपसार्यन्ते वा। तत्राऽपि प्रायः सत्ताविरोधिनि लहरिप्रवाहे एन्टी-इन्कम्बेन्सी फैक्टर इत्याङ्ग्लभाषायां व्यपदेश्ये षष्ठे वर्षे सत्ता विपरिवर्तते एव। किमिदं भवता न दृष्टं यत्त एव मन्त्रिणो ये पञ्चवर्षावधौ सत्तासीनत्वकाले परमेश्वरावतारवत् पूज्यन्ते स्म, सर्वगुणसम्पन्नाश्च वर्ण्यन्तेऽभिनन्द्यन्ते स्म च, सत्तायां विपरिवृत्तायां प्रत्यभिज्ञायन्तेऽपि नैव, के तेऽभूवन्निति ? न कश्चन तान् स्मरति, न वोपसर्पति। साम्प्रतं कथयत, तेषां गुणस्मरणमवितथं वा मिथ्याभूतं वा ? इयं स्तुतिर्वा चाटूक्तिर्वा ?'



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममाऽपि मनसि तदिदं श्रुत्वा कश्चन विचाराघात इवाऽन्वभूयत । मया घोषितमेवाऽभूद् यत् सत्या गुणवर्णना स्तुतिर्भवति, असत्स्वपि गुणेषु गुणाख्यानं चाटूक्तिर्भवतीति । मया तदिदमपि स्पष्टमस्मर्यत यदस्माकं राज्ये पञ्चाशद्वर्षेषु पञ्चवर्षीयनिर्वाचनानन्तरं कदाचिदेकस्य राजनैतिकदलस्य विजयो भवति स्म, तस्मै च सत्ता समर्प्यते स्म, कदाचिच्चाऽपरस्मै दलाय । तदिदमपि स्पष्टं स्मृतिपथमगाद् यत् शासनसत्ताधारणकाले मन्त्रिणां तत्तद्विभागाधिपतीनां कीदृशः प्रतापः, प्रभावश्चाऽऽतङ्कश्च परिदृश्यते स्म । गतायां तु सत्तायां तेषां त एव गुणाः शशशृङ्गवद् विलीयन्ते स्म, येषां वर्णनं चाटुकारैः कृतमभूत् । यथा खलूदिते भानौ तिमिरराशिः सद्य एव विलीयते, तथैव विपरिवृत्तायां सत्तायां सद्य एव, अपरस्मिन्नेव दिवसे, ते गुणा विलीयन्ते स्म । स्मराम्यहं यत्सत्ताकाले ये जनतन्त्राधिपा यैश्चाटुकारैर्वाग्मिनः प्रवचनपटवो, भाषणकुशलाश्चेत्यभिनन्द्यन्ते स्म, ते निर्वाचने पराजयस्याऽपरस्मिन्नेव दिने तैरेव चाटुकारैः केवलं वाचाला, वावदूकाश्च व्यपदिश्यन्ते स्म । कोऽयम-भूच्चमत्कारः ?

मया यदा सर्वोऽयं पूर्वानुभवः स्फुटमुपवर्णितस्तदा सर्वेष्वपि सुहृत्सु सहसैव ब्रह्मज्ञानमिदमुदियाय यदस्माभिरर्थात् प्राग्भिर्भारतीयैश्चक्रनेमिक्रमेण परिवर्तमानानां वस्तूनां स्तुतिः कदाऽपि न कृताऽभूत् । चातक उदीरितवान् – ! बन्धो 'वयमजानीम यद् धनादिसम्पत्तिश्चक्रनेमिक्रमेण परिवर्तते – वेदेऽप्युक्तम् –

"अन्यमन्यमुपतिष्ठन्त रायः ।"

अतो न कदाऽप्यस्माभिर्धनपतीनां चाटुकारिता कृताऽभूत् । कथयत, यथा विक्रमादित्यादिसम्राजां चन्द्रगुप्तादीनां शासकानां, तेषां धनरहितानां किन्तु विद्याबुद्धि-सम्पन्नानां चाणक्यसदृशानां प्रेरकाणाममात्यानां गुरूणां च नामानीतिहासे सुप्रथितानि, तथा कश्चन दिल्लीश्वरस्याऽकबरस्य काले को धनाधीशोऽभूदिति स्मरति किम् ? केवलं चन्दनदासस्य श्रेष्ठिन एकस्य नाम स्मर्यते, तदपि न धनपतित्वेनाऽपि तु मित्र-वत्सलत्वेन ।'

तदैव भव्येशेन समस्तेऽपि विचारप्रवाहे एकः संशोधनप्रस्तावः समु-पास्थाप्यत । तेन कथितं यत् 'सत्तासीनानां यदद्य गुणगानं क्रियते तस्य कारणमपि तु विमृशत । प्रमुखं कारणं तत्राऽपि प्रचारतन्त्रस्य सम्मुखीनता । अद्य खलु प्रचारस्तस्यैव भवति, मीडिया इत्याख्यस्य प्रचारतन्त्रस्याऽवधानं तदैवाऽऽक्रष्टुं शक्यते यदा भवतामुत्सवे कश्चन सत्ताधीशो मुख्यातिथित्वेन समाकार्यते । यदि भवन्तो मन्त्रिपदासीनं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कञ्चनाऽऽकारयन्ति, राज्यपालं, सत्ताधारिणमन्यं वा कञ्चनाऽऽह्वयन्ति तदा शासकीयजनसम्पर्क-सूचना-प्रसारादिविभागानां, दूरदर्शनस्याऽन्येषां वा प्रचार-माध्यमानां, समाचारपत्राणां च प्रतिनिधयः, वार्ताहराः, छायाचित्रकाश्च स्वकीयान् कैमरायन्त्रादीनादाय त्वरितं समुपस्थास्यन्ति, किन्तु यदि भवन्तो मूर्धन्यं कञ्चन विद्वद्वरं विश्वविद्यालयीयमाचार्यं, लेखकं विज्ञानवेत्तारं वाऽतिथित्वेनाऽऽकारयन्ति, तत्र समाचारपत्रेषु न कोऽपि प्रक्ष्यति तं, "काकस्य कति दन्ता" इति । सत्ताया एव सर्वोऽप्ययं चमत्कारः, अत एव सा पूज्यते, सा चिरस्थायिनी वा भवत्वचिरस्थायिनी व । सैव गुणानां जनयित्री, सैव सर्वेषां गुणानां कारणं, न केवलं निमित्तकारणमपि तु समवायिकारणं, यतोऽहि सत्तायां विलुप्तायां गुणा अपि विलीयन्ते ।'

तदैव भव्येशस्य पत्नी सत्तापूजाया अस्याः समर्थनं कुर्वाणा सर्वानस्मारयत् 'किं न स्मरन्ति भवन्तस्तं समाचारपत्रीयं वृत्तान्तं यदेकस्य राजनेतुर्लालनाय चालीसा-स्तोत्रं व्यलख्यत अपाठ्यत च छात्रेभ्यः, अन्यस्य राज्यस्य मुख्यमन्त्रिणी काचित्तस्या मन्त्रिपरिषत्सदस्येनैकेन प्रत्यहं दुर्गारूपेण चित्रे संस्थाप्य पूज्यते स्म, तस्य नीराजनं क्रियते स्म ।' अन्यैरप्युक्तं 'स्मरामस्तद् वृत्तं स्पष्टमेव यतो ह्यस्य मुद्रितस्य वृत्तस्याऽऽधारे प्रसंज्ञानमादाय अथवा केनचन स्थापितेऽभियोगे तस्य राज्यस्य न्यायालयेनाऽपि कश्चन वाद एतद्विषये स्वीकृतोऽभूद् यद् देववत् काऽपि सत्तासीना स्त्री पूज्यते दुर्गारूपेण तस्याश्चित्रं वा प्रकाश्यते चेदस्माकं धार्मिकभावना आहन्यन्ते इत्यादि । समाचारपत्रेष्वेतस्य चर्चाऽभूदिति ।'

मत्पत्न्यपि प्रोक्तवती - 'इदमेव तु रहस्यं सत्तापूजाया, धनपूजायाः, पूजितपूजायाश्च । अद्यत्वे यस्य कस्याऽपि प्रचारः प्रचारतन्त्रेण मीडियाख्येन क्रियते स एव विष्णोरवतार इव पूजयितुमारभ्यते । बन्धुना चातकेन तदिदं तु सत्यमुक्तमासीद् यत् प्राक्तनानां धनपतीनां न कश्चन नामाऽपि स्मरति, किन्तु नाऽऽसीत्तदानीं तत् प्रचारतन्त्रं यदद्य वर्तते । अद्य प्रचारतन्त्रेण यस्य कस्याऽप्यर्बुदपतेः प्रचारः क्रियते, स पूज्यतां याति । श्रेष्ठिवर्यस्य अम्बानीत्याख्यस्य पत्नी कस्मिन् मन्दिरे देवदर्शनं कृतवतीति समाचारपत्रैरद्य प्रचार्यते तस्मिन् मन्दिरेऽपरेद्युरेव जनसम्मर्दो दृश्यते । चलचित्रपटनायकस्य अमिताभबच्चन इत्याख्यस्य पुत्रेण मङ्गलदोषवति जन्मपत्रे सत्यपि ऐश्वर्या राय इत्याख्ययाऽभिनेत्र्या सह विवाहश्चिकीर्षितोऽभूत्, तस्य दोषस्याऽपनोदनाय कस्मिन् देवालये, कस्य ज्योतिर्विदः समीपे, कस्य साधोः समीपेऽमिताभो वा अभिषेको वा गत इति क्षणे क्षणे सञ्जायमानानां घटनानां



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रचारो यदि प्रचारमाध्यमैः क्रियते तर्हि सामान्या अल्पज्ञा लोकास्तमभिनेतारं तु देववत् पूजयिष्यन्त्येव, तं देवालयं, तं ज्योतिर्विदं, तं साधुं चाऽपि पूजयिष्यन्ति ।

तदैव चातकेन स्मारितं यद् 'अमिताभबच्चनाख्यस्याऽभिनेतुर्मूर्तिर्मन्दिरमेकं च भारते निर्मितमस्तीति वृत्तं तेन पठितमासीत् । देववत् पूज्यते स जनैः । यथापूर्वं "नाऽविष्णुः पृथिवीपतिः" इत्याद्युक्तिभी राजानो विष्णोरवतारवत् पूज्यन्ते स्म, तथाऽद्य शाहरुखखानादयोऽभिनेतारः पूज्यन्ते' । चातकपत्नी प्रोक्तवती- 'न केवलं ते पूज्यन्ते अपि तु किशोरीभिरल्पज्ञाभिर्युवतीभिश्च काम्यन्तेऽपि स्वपतित्वेनेति किं न पठन्ति भवन्तो वृत्तपत्रेषु ?'

तदैव मया भगवतो वेदव्यासस्य तत् कालजयि पद्यं स्मृतं यत्र त्रिकालज्ञेन, लोकमानसमर्मज्ञेन तेन कियन्मार्मिकं रहस्यमुदीरितमासीत् सहस्राब्दीभ्यः पूर्वमपि-

"द्वाविमौ पुरुषव्याघ्र ! परप्रत्ययकारिणौ ।
स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः ।"

इदमनुसृत्यैवाऽन्यासु भाषासु तादृश्य सूक्तयः प्रचलिताः स्युः - "Nothing Succeeds like success", सत्यमपीदम् । यथा खलु गड्डरिकाप्रवाहपतिताः कामिन्योऽद्य तमेवाऽभिनेतारं कामयन्ते यः सर्वासां कामितः स्यात् ! एवमेव लोकस्तमेव पूजयितुमुन्मत्तवत् प्रवर्तते यः पूर्वमेव पूजितः स्यात् । सफला एव फलं लभन्ते । अत एव प्रचारतन्त्रेण प्रख्यापिता अभिनेतारः परःकोटिमुद्राव्ययेनाऽऽकार्यन्ते महोत्सवेषु, विख्याता गायका आकार्यन्ते सङ्गीतोत्सवेषु । गड्डरिकाप्रवाहोऽयं लोकं पूजितपूजकं कल्पयति । अत एव प्रचारतन्त्रानुरोधेन मुख्यातिथित्वेन सत्ताधारिण एवाऽऽकार्यन्ते, न विद्वांसो न वा वैज्ञानिकाः । कः खलु पृच्छेत्तान् वराकान् ? अत एव तेषां सत्ताधारिणामेव चाटुकारिता क्रियते ये युगेऽस्मिन् प्रचारानुकूलाः स्युः । कस्मिन्नप्युत्सवे निरक्षरः कश्चन मन्त्री अतिथित्वेन गच्छति, विद्वान् कश्चनाचार्योऽपि, तर्हि समाचारपत्रे वृत्तशीर्षं तस्य मन्त्रिणो भाषणोपरि भवेद् विदुषो वराकस्य केवलं नामोल्लेखः ।'

भव्येशस्तदिदमपि योजितवान् यद् 'इयं प्रवृत्तिः शिक्षासंस्थानान्यपि महामारीवदाक्रान्तवती । पूर्वं शिक्षासंस्थानैर्विश्वविद्यालयैर्वा विद्वांस एव सम्मानार्ह-वाचस्पत्याद्युपाधिभिः (Doctor Degree Honoris Causa) महामहोपाध्याया-द्युपाधिभिर्वाऽलङ्क्रियन्ते स्म । अद्य प्रायशः सत्ताधारिण एवंविधैरुपाधिभिः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सभाज्यन्ते। अत्राऽपि कुलपत्यादयः स्वहितसाधनमात्रोद्देश्येन प्रवर्तन्ते, न तस्य सत्ताधारिणो वैदुष्यं, कृतित्वं वा किञ्चन तत्र कारणत्वमुपयाति। सत्तामात्रस्य तत्र कारणता नाऽन्यः कश्चन हेतुरिति स्पष्टमेवाऽत एवाऽद्य विश्वविद्यालयानां नामकरणं पाणिनि-पतञ्जल्यादिनाम्ना न क्रियतेऽपि तु राजनेतृणां सत्ताधीशानां वा नाम्ना क्रियते खींचीविश्वविद्यालयः सखलेचाविश्वविद्यालयः इत्यादि'।

चातकेन तु स्पष्टकथनस्याऽस्याऽतिस्पष्टता प्रमाणिता। सोऽवोचत् - 'इदं तु न केवलं स्पष्टं, सर्वथा प्रत्यक्षप्रमया प्रमाणितमपीति किमिति पौनरुक्त्येन पिष्टपेषणं क्रियते ? कुलपतयो जानन्ति यत्पूर्वं कुलपतिपदं शिक्षा-विशेषज्ञता-निकषादि-परीक्षणानन्तरं यथा प्रदीयते स्म तथा साम्प्रतं सत्तासीन-राजनैतिक-दलविशेषस्य हितकारित्व-निकषोपरि परीक्षणानन्तरं, स्वकीयदलं प्रति प्रतिबद्धतादिलक्षणादीनां परीक्षणानन्तरं वा सत्ताधारिभिः प्रदीयते। अतः कुलपतिपदलिप्सवः सत्ताधारिणां प्रसादनाय किं किं चाटुकर्म कर्तुं न प्रवर्तेरन् ? पदलाभानन्तरं च तत्प्रत्युत्तरस्वरूपं कार्तज्ञ्यप्रकाशनाय किं किं न कुर्युरिति स्फुटमनुमातुं शक्यते।'

चातकस्य पत्नी मध्य एव प्रोक्तवती - 'भवतां प्रतिपादनेन तु तदिदमेव निष्कर्षरूपेणाऽवगम्यते यदद्य सर्वं स्वार्थैकलक्ष्यपरं संजातम्। स्नेहः, आदरः, गुणज्ञता, अहैतुकी सौहार्दभावना, वैदुष्यं प्रति सम्मानः, सर्वमिदमेव पूर्वं जनानां पारस्परिक-सम्बन्धान् नियमयति स्म। भवतां संलापेन तु तदिदमेव प्रतीयते यदद्य हार्दाः सम्बन्धा विलीनाः, स्वार्थसाधनमेवाऽवशिष्टम्। किं न स्मरन्ति भवन्तो भवभूतिसदृशानां कवीनामेतादृशीर्गिरः ?

''न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः।''

येन सह हार्दः स्नेहसम्बन्धो भवति, तस्मात् प्रत्युपकारस्य, कृतज्ञताप्रकाशस्य च न कदाऽप्यपेक्षा भवति।'

तदिदं श्रुत्वा स्मेरमुखेन मया प्रतिबोधिता चातकपत्नी - 'प्रजावति ! नाऽद्य भवभूतेर्युगम्। विलीनास्तादृशाः स्नेहसम्बन्धा अद्य। ते केवलं पुस्तकस्था एव सन्ति। जानाति भवती यदेकदा मया भवभूतेर्युगस्य, अद्यतनस्य च युगस्य तुलनात्मकं विवेचनं कुर्वाणेन भवभूतेरस्मिन् पद्ये संशोधनं प्रस्तावितमभूत्। अद्य न कोऽपि निष्प्रयोजनं कञ्चिदपि स्नेहसम्बन्धं साधयति।'



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कीदृशं संशोधनं बन्धो ?' – चातकपत्नी मां पृष्टवती ।

मयोत्तरं प्रदत्तम् – 'श्रूयताम् । यदि मम वशे तदिदं स्यात्तर्ह्यहं वर्तमान-युगानुकूलं किञ्चित्परिवर्तनं विधाय भवभूतेरस्य पद्यस्य श्लोकार्धमित्थं परिवर्तयेयम् – ''तत्तस्य किमपि द्रव्यं, येन यस्य प्रयोजनम् ।''

तदिदं श्रुत्वैव सर्वे तारस्वरेण सामूहिकमट्टहासमकुर्वन् । अट्टहासं श्रुत्वा भव्येशस्य सुतः प्रवीणः सपद्येव तस्मिन् कक्षे कुतूहलवशात् समायातः । स खलु प्रबन्धविज्ञाने स्नातकोत्तरपरीक्षामुत्तीर्य सेवावसरगवेषणपरोऽस्तीति सर्वे वयमजानीम । सर्वस्याऽऽस्माकीनस्य सुहृत्संलापस्य वृत्तमस्माभिस्तस्मै सूचितम् । सोऽयं शास्त्रार्थः स्तुतिपरम्परां, चाटुकारपरम्परां चाऽधिकृत्य, एतयोर्विभेदं साम्यं वा प्रतिपादयितुमुपक्रान्त इति ज्ञात्वा स सुतरामानन्दितोऽभूत् । तदनु तेन यत् सूचितं तज्ज्ञात्वा तु वयं विलक्षणतरं कञ्चिदानन्दातिरेकं प्राप्तवन्तः ।

स प्रोक्तवान् – 'पितृव्यचरणाः ! अस्माकं प्रबन्धनविज्ञाने सफलताया ये पन्थान उपदिष्टाः, प्रबन्धनकौशलस्य च ये निकषा निर्धारितास्तेषु चाटुपटुत्वं यद्यपि स्पष्टतया नोपदिष्टं किन्त्विदं सुतरामतिलाभकरं, रामबाणवत् सर्वथाऽमोघं चेति सर्वे वयं प्रबन्धविद्याधीतिनो जानीमः । मया त्वेकं मार्गदर्शकं पुस्तकं सम्प्रति प्रणीयमानमस्ति यत्र सत्ताधारिणामधिकारिणां च प्रसादनस्य विविधाः प्रकाराः सङ्केतिताः सन्ति । येऽद्य राजनीतौ, प्रशासने च सफलतमा जना अवगम्यन्ते, तेषामनुभवान् साक्षात्कारविधया संगृह्य तदिदं पुस्तकमहं लिखामि ।'

भव्येशपुत्रस्य प्रवीणस्य लेखनाधीनेऽस्मिन् मार्गदर्शकग्रन्थे के केऽनुभवाः, के के निष्कर्षाश्च समावेश्येरन्नित्यस्माकं प्रबला जिज्ञासाऽभूत् । तेनाऽस्माकं जिज्ञासां समाधातुं यत् सूचितं तस्मात्कतिपय एव बिन्दवोऽत्रोद्ध्रियन्ते । तेनोक्तं यद् 'अस्मिन् युगे यैर्जनै राजनीतौ, प्रशासनेऽन्यासु च कलासु कौशलेषु च साफल्यमधिगतं तैरिदं स्वीकृतं, निभृतमेव, यदद्य ये सत्ताधारिणः, कर्तुमकर्तुमन्यथाकर्तुं च समर्थास्तेषां प्रसादः साफल्यस्य सर्वप्रथमं साधनं भवति । ते स्वयमप्यनेनैव साधनेन पोतस्वरूपेण संसारसागरयात्रां सफलतया निर्वोढुं समर्था अभूवन् । कतिपये तु सार्वजनिकसभासु सत्ताधारिणोऽतिथिरूपेणाऽऽहूय माल्यार्पणैः, स्वभाषणेषु तेषां गुण-गण-वर्णनैस्तेषां प्रशंसालेखानां वृत्तपत्रादिषु प्रकाशनैरन्यैश्च प्रकारैस्तेषां परमं प्रसादमधिगम्य स्वजीवने सफलाः सञ्जाताः । कतिपयेषां दृष्टिस्तु सर्वदा तादृशानवसरान् सावधानतया प्रतीक्षते स्म यत् सत्ताधारी मुख्यातिथिः स्वभाषणे यदि विनोदगर्भं किञ्चनाऽपि कथ्यं, घटनां,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्तु वा प्रस्तौति, तदुपरि कथं सुमहानट्टहासस्तैः क्रियते येन तस्य प्रसादनं संभवेत्। "किमिति भवानस्य मुख्यातिथेर्विनोदेष्वेवं तारस्वरीयमट्टहासं करोती"ति पृष्टास्तादृशा जना आङ्ग्लभाषायामित्थं तत्कारणमपि प्रस्तुवन्ति – "Pleasure is power, money is honey : My Boss's jokes are so much funny." अर्थाद् "यस्य प्रसाद एवाऽस्मान् शक्तिमतो विदधाति, सम्पदं प्रयच्छति, तस्य ममाऽधिकारिणो विनोदा अत्यन्तं हर्षाधायका भवन्ति, अतो हसामि" इति। एवंविधानां जनानां करद्वयं सत्ताधारिणां भाषणकाले सर्वदा व्यस्तं, तालिकाध्वनिनिरतं च तिष्ठति यतस्तेषां सूक्ष्मा दृष्टिः सर्वदा तादृशानवसरान् प्रतीक्षते यन्महामहिमशालिनोऽस्याऽतिथेर्भाषणे किं खलु तादृशं वाक्यं निर्गच्छेद् यदुपरि साटोपं करतलध्वनिर्विधीयेत येनाऽन्येऽपि करतलध्वनिं कुर्युः, वक्ता च प्रसन्नो भवेत्।'

'तदिदं त्वस्माभिरेषु दिवसेषु साहित्यजगति, ग्रन्थप्रकाशनक्षेत्रे चाऽपि सुस्पष्टं दृश्यते एव यद् बहवो नैसर्गिकप्रतिभाशालिनः कवयः, कथाकाराश्च सश्रमं लेखनं विदधति किन्तु तेषां पाण्डुलिपीनां प्रकाशानाय न कोऽपि प्रकाशक उत्सहते' किन्तु यदि कश्चनाऽर्धदग्धः कतिपयपदानां हठादाक्रष्टा लेखकः प्रशासने उच्चाधिकारी भवेत्, सत्ताधारी वा भवेत्, तस्य किंभूत-किमाकारमपि लेखनं प्रकाशयितुं प्रकाशका अहमहमिकया प्रवर्तेरन्। प्रकाशिते च ग्रन्थे तस्य प्रशस्तये बहवः स्वार्थसाधन-पराश्चाटुकाराः समीक्षालेखनाय समुत्सहेरन्। पत्रकारा अपि तादृशानां सत्ताधारिणां ग्रन्थस्य समीक्षाणां स्वपत्रिकासु प्रकाशने सविशेषं रुचिमन्तो दृश्येरन्। विदुषां, समर्थकवीनां वा ग्रन्था उपेक्षा-करण्डकेषु कामं प्रक्षिप्येरन्निति प्रत्यहं पश्याम एव।'

चातकेनैतदुपरि टिप्पणी कृता, 'वत्स प्रवीण! जानास्येव त्वं यत्सत्ताधारिणां लेखनस्य मूल्याङ्कनं तद्गुणावगुणाधारमादाय न विधीयते, अपि तु कस्य पदं कियदुन्नतमस्ति, कस्य सिंहासनं च कियत्महार्घमस्ति, तत्सर्वं सन्धाय क्रियते। अतः सत्तासीनानामेव पुस्तकानि प्रकाश्येरन्, तान्येव च यदि सामूहिकक्रयाभियानेषु, पुस्तकालयानां कृते क्रययोजनासु च क्रीयेरन्, किमत्र चित्रम्?' इदं खलु सर्वानुभूतं सत्यमासीदतो न केनाऽप्यस्य प्रतिवादः कृतः।

प्रवीणेन तदनन्तरं साफल्यस्य मूलमन्त्रभूता अन्येऽपि चाटुप्रकाराः संसूचिता 'ये खल्वेषु दिवसेषु सर्वत्र प्रत्यक्षीक्रियन्तेऽपि। सत्ताधीशवंशजानां, पुत्रादीनां च चाटुक्रियाऽप्यमोघफलदायिनी भवति। अद्य राजनीतौ सा दृश्यत एव। अपरं च वयं जानीम एव यदि कश्चन मुख्यातिथिः सत्ताधारी वा स्वकीये भाषणे सुतरामयथार्थं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृषाभूतमनुपयोगि च किञ्चन वक्ति, तस्य प्रतिवादः, खण्डनं वा न कदापि क्रियते, प्रत्युत बहवश्चाटुकारास्तस्य समर्थनायाऽप्युत्सहन्ते । एकदा केनचन सत्ताधारिणा स्वकीये भाषणे पलाण्डुभोजनस्य प्रशंसा कुर्वाणेन कथितं यत् पलाण्डुः कन्दानां राजा, सर्वविधांश्च गुणान् बिभर्ति, अतस्तत्सेवनं मनुजानां कृते हितकरम् । एतदुपरि बहुभिश्चाटुकारैरेतस्य समर्थनं कृतम् । अपरस्मिन् दिने तेनैवाऽपरस्मान्मञ्चात्प्रोक्तं यत् पलाण्डुसेवनं सुतरां गर्हितमतोऽस्माभिस्त्याज्यम् । तदुपर्यपि तैरेव बहुभिश्चाटुकारैरस्याऽपि वक्तव्यस्य समर्थनमकारि । यदा ते पृष्टा यद् "ह्यस्तु भवता पलाण्डोः प्रशंसा कृताऽभूत्, अद्य किमिति तस्य निन्दा क्रियते ?" तैः प्रत्युत्तरे सूचितं- "बन्धो ! सोऽयं वक्ता ममोच्चाधिकारी वर्तते, येन ह्यः पलाण्डुप्रशंसा कृता, अद्य निन्दा । अहं पलाण्डो सेवकस्तु नाऽस्मि, एतस्य सेवकोऽस्मि । अत एतस्य विचारैः सह मम सहमतिः स्यात्तर्हि किमत्र चित्रम् ?" बहुभिः प्रबन्धनकलाकुशलैरिदं सूत्रमप्युपदिश्यते यदुच्चाधिकारिणां मतं कीदृशमपि स्यात्, तस्य प्रतिवादो न श्रेयस्करः !! बहुभिस्त्वधीनस्थैः स्वाभिमतं स्वच्छन्दतया, निर्द्वन्द्वतया च प्रस्तोतुमादिष्टैरपि प्रायस्तदिदमेव कथ्यते - "My lord ! your lordship's views are my views !!" अर्थात् "किं भवतामभिमतम् ?" इति पृष्टेनाऽधीनस्थेन तदिदमेवोत्तरं दीयते "श्रीमन् यच्छ्रीमतामभिमतं, तदेव तु ममाभिमतम् ।" इति' ।

तदिदं श्रुत्वा भव्येशस्य सुता रोहिणी या खल्वेतदवधि मौनं स्थिता सर्वं संलापं शृण्वन्त्यासीत्, हिन्दीचलचित्रस्यैकस्य किञ्चन गीतं स्मृतवती, सहसैव तदुद्धरन्ती तारस्वरेणाऽगायत्- 'सर्वमिदमुपलक्ष्यैव हिन्दीफिल्मनिर्मात्रा यदिदं गीतं प्रचारितं तदद्य साफल्यसूत्रत्वेन सुतरां स्मरणीयं सञ्जातम् -

"जो तुमको हो पसन्द, वही वात कहेंगे ।
तुम दिन को अगर रात कहो, रात कहेंगे ।"

अर्थात् - यद् भवते रोचते, तदेव वक्ष्यामः, यदि भवान् दिवसं रात्रिं व्यपदिशेद् वयमपि तं रात्रिरित्येव वक्ष्यामः ।'

मत्पत्नी लेखिकाऽस्ति, पत्र-पत्रिकादीनां प्रत्यहं वाचनं चाऽपि करोति । तया विनोदविधया सूचितं यत् - 'चाटुपटुत्वस्यैकमन्यन्निदर्शनं गतेषु दिवसेषु दृष्टिपथमायातम् । बहवः पत्र-पत्रिकापाठकाः पत्रिकाया अङ्कविशेषं वाचयित्वा स्वाभिमतं प्रकटयितुं यत् पत्रं सम्पादकाय लिखन्ति तस्मिन्नन्यां सर्वामपि मुद्रितां सामग्रीमनभिधाय "सम्पादकीय"स्यैव प्रशंसामवश्यं कुर्वन्ति । अहं गतेषु पञ्चाशद्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षेषु दैनिकानि, साप्ताहिक-मासिकादीनि च वृत्तपत्राणि, साहित्यिकपत्राणि च सततं पठन्ती न कदाऽपि पूर्वमिदं दृष्टवती यत्कश्चन पाठकः सम्पादकीयपठनाय वृत्तपत्रं गृह्णाति, पत्रं विलिख्य च, सम्पादकीयं प्रशंसति । सम्पादकीयो लेख उत्कृष्ट एव स्यादिति प्रायः सर्वविदितं तथ्यम् । तस्य प्रशंसा कृताऽकृतत्वमेव प्रमाणयति स्म, किन्तु सैव क्रियते सम्प्रति ।

मध्य एव चातकपत्नी प्रोक्तवती, 'भगिनि ! किं न वेत्सि त्वं यत् सम्पादकीय-प्रशंसायाः पत्रमवश्यमेव पत्रिकाया आगामिन्यङ्के: प्रकाश्येत इत्याशयैव चाटुकारैः पाठकैर्नामग्राहं सम्पादकीयं प्रशस्यते ।' मत्पत्न्या तदैव भवभूतिपद्ये मदीयं संशोधनं स्मारितम्- 'अत एव तु तदिदं वाक्यार्धं सार्थकं प्रतीयते ''येन यस्य प्रयोजनम् ।'' येन कार्येण प्रयोजनसिद्धिर्भवेत्तदेव कार्यं करणीयमस्मिन् युगे । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।'

यथैव प्रयोजनस्य चर्चा समारब्धा, सर्वेषामस्माकं मनसि स्वकार्यव्यापृतताया अर्थक्रियाकारित्वस्य च चिन्ता समुदभूत् । 'किमिति चाटुशास्त्रविवेचने वयं समययापनं कुर्म' इति ब्रुवाणेन मया भव्येशादयोऽभिवादिताः, सूचितं च यदभिनन्दनपत्रप्रणयनेन किमस्माकं प्रयोजनं सेत्स्यति ? इदं तु भव्येशस्य, चातकस्य च कार्यं; तयोर्नियोगे किमस्माकं प्रयोजनम् ? अतो वयं गच्छाम' इति । चायपानस्य यत् प्रयोजनमासीत्, तत् सिद्धमेव । अतोऽहं, मत्पत्नी च यथैव प्रस्थातुकामावभूतां तथैव निकटस्थे प्रकोष्टे स्थितस्य दूरदर्शनयन्त्रस्य वृत्तपत्र (News Bulletin)प्रसारणध्वनिरश्रूयत । तत्र हि साहित्य-कला-पत्रकारतादिविविधक्षेत्रेषूल्लेखनीयं कार्यं कृतवद्भ्यो महापुरुषेभ्यः केनचन भारतप्रसिद्धेन संस्थानेन प्रदास्यमाननामलङ्करणानां पुरस्काराणां च घोषणा क्रियमाणाऽभूत् । अनेन प्रन्यासेनाऽस्मिन् वर्षेऽभिनयक्षेत्रे उल्लेखनीयाय कार्याय अमिताभबच्चनः, कलाक्षेत्रे लतामङ्गेश्करः, अर्थशास्त्रक्षेत्रे अमर्त्यसेनः, साहित्ये महाश्वेता देवी, धर्मक्षेत्रे दलाईलामा, विज्ञानक्षेत्रे ए.पी.जे.अब्दुल कलामः, शिक्षाक्षेत्रे यशपालः अमुक-पुरस्कारैः सभाजयिष्यन्ते इति वृत्तं प्रसार्यमाणमासीत् । एवमेव विविधेषु विषयेषु क्षेत्रेषु च तत्तत्कार्यविशेषे प्रतिष्ठितचराणां विश्वविदितानां विशेषज्ञानां नामानि घोष्यमाणान्यासन् ।

सर्वमिदं श्रुत्वा मत्पत्नी पृष्टवती - 'अरे, एतस्य प्रन्यासस्य पुरस्कारान् स्वीकर्तुमेते विश्वविख्याता दिग्गजाः किमित्यागमिष्यन्ति तस्मिन् लघुनि नगरे ? कथं वा एतेषां महापुरुषाणां गरिमा वर्धिष्यते पुरस्कारैरेभिः ?' मया कथितम् - 'देवि !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वं जानानाऽपि किमेवमज्ञा भवसि ? एभिः पुरस्कारैरेतेषां महापुरुषाणां गरिमा तु न वर्धिष्यते । किन्तु महापुरुषाणामेषा नामभिरेतैषां पुरस्काराणां गरिमा त्ववश्यमेव वर्धिष्यते । इदमेव तु प्रन्यासस्याऽस्य प्रयोजनं तथाविधानां नामघोषणे ।' तदा खलु भूयोऽपि व्यासनीतिवाक्यस्याऽस्य मोघार्थवत्ता प्रत्यक्षमनुभूता आवाभ्याम् ।

"स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः ।"

ये प्रथितपूर्वाः, पूजितपूर्वाः तेषामेव पुनः पुनः पूजनेन न खलु पूज्यानां महिमा वर्धते अपि तु पूजकानां महिमा उपचीयते । किं न पठितानि वृत्तानि प्रत्यहं यद्यदि कश्चित् प्रतिष्ठितो जनः कुत्रचन महता सम्मानेन सभाज्यते तर्हि तदनु तस्य चाटुकाराः स्थाने स्थाने तदुपलक्ष्ये तदनुवर्तिनो वर्धापनसमारोहानायोजयन्ति !!'

'किमयमपि चाटुचर्याया एव कश्चन प्रकारोऽस्ति ?' मत्पत्नी सपरिहास-मनुयुक्तवती । 'नैव, नैव', मया कथितम्, 'नेयं चाटुचर्या किल, सेयं हि सुमहती चातुर्य-चर्या विद्यते । चतुरा विक्रेतारः स्वपण्यवस्तूनां विक्रयवृद्धये यथा प्रचारयन्ति यदेतस्य फेनकस्य (Soap, साबुन) प्रत्यहं प्रयोगं माधुरी दीक्षिता करोति, रानी मुखर्जी वा करोति तथैव स्वसंस्थायाः स्वसंस्थानीयपुरस्काराणां च महिमख्यापनाय कनीयांसि संस्थानानि प्रचारयन्ति यदियं सा संस्थाऽस्ति, अयं स पुरस्कारोऽस्ति येन भारतस्य भूतपूर्वो राष्ट्रपतिः पुरस्कृतचरः, नौबेलपुरस्कारविजेता वैज्ञानिको वा पुरस्कृतचर इत्यादि ।' नवयुगीनानां नूतनानामेषां महाजनीयानां चातुर्याविष्काराणां परिज्ञानेनाऽद्यतने सुहृत्संलापे यदस्माकं नेत्रोन्मीलनं समभूत्तेन चिररात्राय सर्वे वयं प्रहृष्टमानसाः स्थास्याम इत्येवं विचारयन्तः सर्वे स्वगृहान् प्रत्यावृत्ताः ।

[मञ्जुनाथ स्मृति संस्थानम् C/8 पृथ्वीराज रोड, सी. स्कीम, जयपुर, ३०२००१]





Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यानुवादः

## कलिंग जीत्यो पण मानवता वधेरी

कर्ता-अज्ञातः

मे देशनी दोलत वेडफीने
हण्या युवानो नवराष्ट्रसर्जको,
रची अशांति, प्रगति य रोधी
शी युद्ध अंते वरसिद्धि साधी ?
कलिंग जीत्यो पण जीततां तो
में प्राण-शी मानवता वधेरी,
जीत्या नहि आत्मरिपु महाबला
आ स्थूल जीते वसी सूक्ष्म हार ।

## कलिङ्गो विजितोऽपि मानवता हता

अनु. मुनिधर्मकीर्तिविजयः

देशस्य सम्पत्तु मया विनाश्य
हता युवानो नवराष्ट्रमूलाः ।
क्लेशः कृतो हि प्रगतिश्च रुद्धा ।
का श्रेष्ठसिद्धिस्तुमुलेन सिद्धा ? ॥
जितः कलिङ्गो जयताऽपि हन्त !
मनुष्यता प्राणसमा विशस्ता ।
नाऽन्तर्विपक्षा विजिता मयाऽहो !
अस्मिन् जये सूक्ष्मपराजयोऽस्ति ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्यानुवादः

# आमन्त्रणम्

**आङ्ग्लभाषायां लेखकः** **(गूर्जरभाषायाम्)** **गूर्जरभाषायामनुवादकः**
ओरियाह माउन्टन ड्रीमरः **ऋषभ-परमारः**
(केनेडादेशे शिक्षको लेखकश्च)

तमे जीववा माटे शु करो छो ए जाणवामां मने रस नथी,
मारे जाणवुं छे तमारा हृदयमां ऊंडी कोई आरत छे के केम ?
अने, ए फळीभूत थवानु स्वप्न जोवानी हाम छे के नहि ?
तमारी उंमरमां पण मने रस नथी
प्रेम स्वप्न अने जीवंत रहेवाना साहस-खातर गांडा देखावानुं जोखम तो
खेडी शको छो ने ?
मारे जाणवुं छे के तमे पीडा साथे स्वस्थ बेसी शको छो-
एने छुपाववा-घटाडवा के मटाडवाना प्रयत्नो वगर ?
मारे जाणवुं छे, तमे विश्वासघातनो आरोप सही शको छो-
पोताना आत्मानो विश्वासघात कर्या वगर ?
मारे जाणवुं छे के दिन-ब-दिन आकर्षणना आटापाटा वच्चे तमे
सौन्दर्यने जोई शको छो ?
एनी हयातीमां तमारा जीवननो स्त्रोत अनुभवी शको छो ?
तमे क्यां, शुं अने कोनी पासे भण्या एमां मने रस नथी.
मारे जाणवुं छे के बहार बधु ज पडी भांगे छे त्यारे अंदर तमने
कोण टकावी राखे छे ?
मारे जाणवुं छे के तमे जात साथे एकला रही शको छो ?
खाली क्षणोमां तमारो सथवारो तमने गमे छे ?

*

(भारतीयविद्याभवनतः प्रकाश्यमानायां
**नवनीतसमर्पण**-नामगूर्जरमासपत्रिकायां
- २००८ तमवर्षस्य ओक्टोबरमासे प्रकाशितमिदं काव्यम्)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# आमन्त्रणम्

काव्यानुवादः

( संस्कृतभाषायाम् )

अनु. मुनिकल्याणकीर्तिविजयः

➲ जीवनं जीवितुं भवान् किं करोति - इति ज्ञातुं नाऽस्ति ममोत्कण्ठा,

⌑ अहं त्वेतदेव ज्ञातुमिच्छामि यत्- किं भवतो हृदयगह्वरे गहना काऽपि महेच्छाऽस्ति वा ?

तथा, तां महेच्छां सफलयितुं स्वप्नदर्शने सामर्थ्यं वर्तते वा ?

➲ भवतो वयः किमस्तीति ज्ञातुं न विद्यते मे स्पृहा ?

⌑ किन्तु, प्रेमकृते स्वप्नसिद्ध्यर्थं साहसाय च भवान् मूर्खतामाचरितुमपि शक्नुयाद् वा ?

⌑ अहं ज्ञातुमिच्छामि यत्, भृशं पीडितोऽपि भवान् स्वस्थः स्थातुं शक्नुयाद् वा - तां(पीडां) गोपयितुं, न्यूनीकर्तुमपगमयितुं वा प्रयत्नानकृत्वा ?

⌑ अहं ज्ञातुमिच्छामि यत्, किं भवान् विश्वासघातस्याऽऽक्षेपं सोढुं शक्तो वा - स्वविश्वासघातमकृत्वैव ?

⌑ अहं ज्ञातुमिच्छामि यत्, सर्वत्रोद्भूयमानानामाकर्षणानां मध्येऽपि भवान् प्रत्यहं सौन्दर्यं विलोकयितुं शक्तो वा ? तस्मिन् सत्येव जीवनस्रोतः प्रवहतीति चाऽनुभवितुं शक्तो वा ?

➲ भवान् कुत्र, किं कुतो वा शिक्षितवान् - इत्यत्र नाऽहमुत्कोऽस्मि ।

⌑ अहं तु ज्ञातुमिच्छामि यद् बहिर्यदा सर्वमपि विनश्यति तदाऽन्तःस्थं किं तत्त्वं भवन्तमुपष्टम्भयति ?

⌑ अहं त्वेतदपि ज्ञातुमिच्छामि यद् भवान् स्वेन सहैकाकी स्थातुं शक्तो वा ? विरलक्षणेषु स्वस्यैव मैत्री साहचर्यं च भवते रोचते वा ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुवादः

# सत्साधु(संत)-निर्णयः

गूर्जरभाषायां लेखकः **भाणदेवः**
अनुवादकः **मुनिकल्याणकीर्तिविजयः**

एकदा वाराणस्यां स्वीयाश्रमे माताऽऽ**नन्दमयी** कैश्चिज्जिज्ञासुभिः सह सत्सङ्गं कुर्वाणोपविष्टाऽऽसीत् । तदैव कस्माच्चिददतिदूरात् स्थानात् समागतः कश्चिदज्ञातः सज्जनोऽपि तत्र प्रविष्टः । सोऽपि सत्सङ्गार्थं तैः सहैवोपविष्टः । स हि सर्वत्र मातुः प्रशंसां श्रुत्वाऽभिभूतोऽध्यात्माभिमुखचित्तश्च स्वभावतः, 'स्वीयाध्यात्मयात्रायां किञ्चिद् मार्गदर्शनमत्र प्राप्येत' इत्याशयाऽत्र वाराणस्यां मातुः पार्श्वे आगत आसीत् ।

मातुः सत्सङ्गस्तु यथापूर्वं प्रवर्तमान आसीत् । सा हि किञ्चित् तत्त्वं वर्णयमानाऽऽसीत् । सर्वैः सहाऽयमज्ञातः सज्जनोऽपि तत् शृण्वन्नासीत् । अथाऽकस्मादेव कुतश्चिदागता काचन मक्षिका मातुर्मुखोपर्युपविष्टा । तया च सहजमेव हस्तं विधूय सा निवारिता । तत्त्ववर्णनं तु प्रवर्तितमेव । किन्तु नवागन्तुकस्य सज्जनस्यैतदुचितं न प्रतिभातम् । तन्मनस्येतद् दृष्ट्वा बहु दुःखं जातम् । स झटित्येव तत उत्थाय बहिरागतः ।

एतद् दृष्ट्वा केनचिदाश्रमवासिना पृष्टं- 'महोदय ! किमिति भवान् सत्सङ्गादियत्त्वरया बहिरागतवान् ? किमपि कष्टं तु नैव जातम् ?'

तेनोक्तं - 'अरे ! किं वा वदेयम् ? मम तु श्रद्धाभङ्गो जातः ।'

आश्रमवासी पृष्टवान् - 'तादृशं किं वा जातं भोः !?'

'माता त्वस्मादृश्येवाऽस्ति ननु !'

'अरे ! किमर्थमेवं वदति भवान् ? तथाविधं किं घटितं यदेवमुच्यते भवता ?'

'अस्माकं तस्याश्च मध्ये न कोऽपि भेदो मे प्रतिभाति । पश्यतु, मातुर्मुखे मक्षिकोपविष्टा, तया चाऽस्माभिरिवैव सा निवारिता स्वहस्तेन । अयं व्यवहारस्तु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामान्यजनतुल्य एव । तथा चाऽस्मासु तस्यां च कः प्रतिविशेषः ? भवानेव वदतु । . . . . . . अहं तु बहुदूरवर्तिप्रदेशान्महतीमपेक्षां धारयन्नत्राऽऽगतः । मातृविषये मया दिव्यं भव्यं च बहुतरं श्रुतमासीत् । किन्तु, एतत्सर्वदर्शनेन तत् सर्वं मे मिथ्यैव प्रतिभाति । नूनं साऽपि चाऽस्मादृश्येव ।'

आश्रमवासी सज्जनस्त्वेतच्छुत्वा मौनमेवाऽस्थात् ।

नवागन्तुको हि सज्जनः स्वोपस्कारं (Luggage) बद्ध्वा रेल्-वे-स्थानकं गत्वोचितेन यानेन स्वगृहं गतवान् ।

एष प्रसङ्गो ज्ञापयति यत् साधुजनमवगन्तुं वयं सर्वथाऽपक्वा वामनाश्चैव ।

सर्वेऽपि भारतवासिनो मातरं **श्रीआनन्दमयीं** परमपवित्रां सत्त्वशालिनीं च साध्वीं मन्वते स्वीकुर्वन्ति चैव । येऽपि तस्या अनुयायिनो न सन्ति तेऽपि तस्या आध्यात्मिकमौन्नत्यं सत्साधुत्वं च मानयन्ति एव । एवं स्थितेऽपि यः केवलं मक्षिकानिवारणरूपां स्वाभाविकीं घटनां दृष्ट्वा तां सामान्यां मन्येत श्रद्धाभङ्गं चाऽनुभूय तत्स्थानान्निर्गच्छेच्चाऽपि तादृशो जनः कथं वा सद्बोधवान् स्यात् ?

साधुजना अपि मानवाः शरीरधारिणश्च सन्ति । क्षुत्पिपासा-शीतोष्णता-रोगतच्चिकित्सा-शौचशुद्ध्यादयो धर्माः पृथग्जनवत् तेषामपि सम्भवन्त्येव । तेऽपि हि शीतकाले शीतत्राणि धारयेयुः, क्षुद्बाधिताश्च भोजनं कुर्युः । किञ्च तेषामपि विविधभोजनेषु रुचिररुचिर्वा सम्भवेत् - अस्माकमिव । तेषां शरीरेऽपि व्याधिबाधा सम्भवेत् तदर्थं च चिकित्साऽपि कारयितव्या भवेत् । एवं करणे च न काऽपि क्षतिस्तेषां सम्भावनीया । कदाचित् कुत्रचिद् वृश्चिकादयोऽपि तान् दशेयुस्तद्दशनेन च वेदना-चीत्कारादयोऽपि तेषां सम्भवेयुर्यतस्तेऽद्याऽपि शरीर-धारिणः । अतस्तत्सर्वं दृष्ट्वा यस्तेषां स्खलनं मन्येत तस्य बोधोऽद्याऽप्यपरिपक्व एवेति मन्तव्यम् ।

साधुजनाः पाषाणमयाः काष्ठमया वा न भवन्ति यन्मुखे स्थितां मक्षिकामपि न निवारयेयुः । अपि च, येषामसाधारणाः सिद्धयः शक्तयश्च भवेयुस्त एव महात्मानो भवन्ति-इत्यपि न युक्तम् । ईदृश्यः शक्तयः साधुत्वस्य नाऽनिवार्यं लक्षणं नाऽपि च कस्यचिदाध्यात्मिकप्रगतेर्मानदण्डः ।

किञ्च, सामान्यजनतातः किञ्चिद् विलक्षणतया यो वर्तेत स एवोत्तमः साधु-रित्यपि नोचितम् । केचिदभिनयकुशला दम्भिनो जनताया विलक्षणतया



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचिच्चाऽत्यन्तं विचित्रतया वर्तनं कुर्वाणा जनानां समक्षं स्वीयमुत्तमं साधुत्वं प्रमाणीकर्तुं प्रयतन्ते। किन्त्वेतादृशोऽभिनयोऽपि साधुत्वस्य लक्षणं नाऽस्त्येव, अत एतेभ्यः सावधानीभवितव्यम्।

एवं स्थिते प्रश्न उत्तिष्ठतेऽयं यद्-उत्तमानां सत्-साधूनां किं लक्षणं? कानि वा चिह्नानि तानवगन्तुमुपयोगीनीति। एतत्समाधानार्थं कानिचित् प्रधानानि लक्षणानि प्रस्तुतानि सन्त्यत्र यानि सत्पुरुषानवगमयितुमस्माकमुपयोगीनि।

(१) साधुजनानां प्रथमं लक्षणमस्ति पारदर्शिता - अर्थात् नितान्तं सारल्यम्। यादृशमन्तःकरणे भवति तादृशमेव बहिः प्रकटीभवेत् - एतदत्यन्तमावश्यकम्। मनस्यन्यद्, वचस्यन्यद्, आचरणे तु सर्वथाऽन्यदेवेत्येतत् साधुजनानां लक्षणं नाऽस्त्येव। एतत् तु प्रकटं दम्भ एव। अतो यत्रैतादृशं नाटकं - यथाभूतं तत्त्वं निह्नूयाऽन्यथा प्रदर्शने उत्साहः - दृश्येत तत्राऽवश्यं किमपि शङ्कास्पदं सम्भावनीयम्।

(२) मानसातीतचेतनायां यस्य प्रवेशोऽधिकारश्च स्यात् स सत्साधुः। अर्थात् - अध्यात्मतत्त्वस्य येन दर्शनलेशोऽपि कृतो भवेत् स सत्साधुः। वस्तुतः साधुजनानां प्रधानमनिवार्यं च लक्षणमिदमेव। अस्मिन् सति ह्यन्यानि लक्षणानि स्वयमेव प्रादुर्भवन्ति। अनेन विना च सर्वाण्यप्यन्यानि लक्षणानि निर्नायकसैन्यमिवाऽकिञ्चित्कराणि। विद्वत्त्वं, वैराग्यं, त्यागः - इत्यादयः सर्वेऽपि गुणा अस्मिन् लक्षणे विद्यमाने परां काष्ठां प्रतिपद्यन्ते।

मानसातीतभूमौ प्रवेशो हि सर्वथाऽऽन्तरिकी घटनाऽस्ति। अस्मादृशां सामान्यजनानामेतल्लक्षणं ज्ञातुमशक्यप्रायम्। सुज्ञजना एवैतज्ज्ञातुमर्हन्ति। अत एव साधुजनानामन्यानि लक्षणानि लक्षणीयान्यस्माभिः।

(३) अस्माकं देशे जनाः प्रायः श्रद्धालवो भवन्ति। तेषां हृदये धार्मिकी भावना साधूंश्च प्रति हार्दो भक्तिभावो भवत्येव। यदि केचित् साधवः स्वस्य स्वीयमठादिकस्य वा स्वार्थं कञ्चित् साधयितुं जनानां श्रद्धादिभावनाया दुरुपयोगं कुर्युस्तदा तत् सर्वथाऽशोभनीयम्। धर्मश्रद्धामध्यात्मं च पुरस्कृत्य जनानां शोषणमपराध एव। सत्साधवो ह्येतन्नैव कुर्वन्ति।

(४) सत्साधूनामिदमप्यपरं लक्षणमस्ति - धनादिपरिग्रहेऽनासक्तिः। यद्यपि साधवो निष्परिग्रहा - निष्किञ्चनाश्चैव भवन्ति। तथाऽपि समाजे वसन्तस्ते कदाचित्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाजोद्धारमन्यत् वा तादृशं कार्यजातमाश्रित्य धनसङ्ग्राहणे तद्व्यवस्थाकरणे च जनान् प्रेरणादिकं कुर्युस्तदा न दोषः । किन्तु वणिजामुद्योगपतीनां वेव साधुरपि धनसङ्ग्रहे एव रतः स्यात् स्वानुयायिजनेभ्यो वा धनग्रहणस्योपायान् मार्गयमाणः स्यात् तदा न तद् योग्यम् । एतद्धि सत्साधूनां लक्षणं नाऽस्त्येव ।

साधुजीवने यदि परं धनस्य स्थानं, तद् गौणमेव स्यात् । यदि धनं केन्द्रस्थानं प्राप्नुयात् तदा निश्चप्रचं तत् साधोर्मार्गच्युतेरेव लक्षणम् ।

(५) अधिकारी कश्चन साधुजनः कञ्चिदुत्तमं जनं शिष्यतया स्वीकृत्याऽध्यात्मपथे तं योजयेत् तदर्थं च मार्गदर्शनं कुर्यात् तदा तदुचितं योग्यं च । किन्तु यदि यः कोऽपि स्वमधिकारिणं मत्वा केवलं स्वशिष्यसङ्ख्यावृद्ध्यै एव सर्वात्मना प्रयतमानो दृश्येत तदा न स सत्साधुरिति ज्ञातव्यम् ।

वस्तुतो हि सत्साधोश्चित्ते गुरुपदप्राप्तेरेषणालेशोऽपि नैव भवेत् । कर्तव्यभावेन धर्मकार्यतया वा कस्मैचित् सज्जिज्ञासवे मार्गदर्शनमवश्यं कर्तव्यम् । किन्तु यदि शिष्यप्राप्तेरेषणा स्यात् तदा साधुत्वमपक्वमेवेति मन्तव्यम् ।

(६) पावित्र्यं हि साधूनामनिवार्यं लक्षणम् । विद्वत्ता, प्रवचनकौशलं, सभाप्रभाविता, गभीरं शास्त्रज्ञानमित्यादयो बहवो गुणा अपि चारित्र्ये शिथिले सति सर्वथाऽकिञ्चित्करा भवन्ति । असदाचारो हि साधुः साधुत्वाच्च्युतिं प्राप्नोत्येव जनैश्च त्याज्यो भवति । अतः सत्साधुत्वाभिलाषिभिः सदाचारः सर्वदा सर्वयत्नैश्च रक्षणीयः ।

(७) अध्यात्मपथस्य मूलगामी स्पष्टश्च बोधो हि साधुजनानामनिवार्यं लक्षणम् । वाणिज्यबोधरहितो यथा वणिग् भवितुं नाऽर्हति तथैवाऽध्यात्मबोधरहितोऽपि याथार्थ्येन साधुत्वं नैव प्राप्नोति ।

अध्यात्मपथस्य बोधस्त्रिधा भवेत्-

( १ ) **अध्यात्मसाधनाऽनुभूतिश्च** - अध्यात्मपथस्य दृढाभ्यासो यैः कृतस्तेन च यथासामर्थ्यमनुभवोऽपि प्राप्तस्तेऽध्यात्मबोधवन्तो भवन्ति ।

( २ ) **अध्यात्मशास्त्राध्ययनम्** - अध्यात्मविषयकान् प्रामाणिकान् ग्रन्थान् सम्यगधीत्याऽप्यध्यात्मबोधो भवति ।

( ३ ) **सत्सङ्गः** - अध्यात्मविदां सत्साधूनां सङ्गेन सेवनेन मार्गदर्शनेन



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वचःश्रवणेन चाऽपि पथोऽस्य बोधो भवति ।

एवंरीत्या येषां साधूनामध्यात्ममार्गस्य बोधः सम्यक् परिपक्वश्च भवति त एवाऽध्यात्मपुरुषा भवन्ति स्वानुयायिनश्च यथार्थं बोधयितुमर्हन्ति । ये स्वयमज्ञास्तेऽन्यान् किं वा बोधयेयुः ?

अतोऽध्यात्मपथस्य सम्यग् बोधः सत्साधूनां लक्षणतया परिगणितः ।

(८) सत्साधवो हि साधनापरायणा भवन्ति । ये सिद्धास्ते यथारुचि वर्तन्तां नाम, किन्तु ये न सिद्धा नाऽपि चाऽभ्यासपरायणास्ते निश्चप्रचमध्यात्मपथात् भ्रष्टा भवन्ति । अत एव साधनापरायणता साधूनामनिवार्यं लक्षणम् । भगवद्भावप्राप्त्यर्थं त्यक्तसङ्गाः साधवो यदि तदर्थमभ्यासरता न भवन्ति तदा तेषां साधुत्वमपि विफलमेव ।

धर्मसेवा, समाजसेवा, आश्रमसेवा - इत्यादिभिरुत्तरदायित्वैर्योऽध्यात्म-साधनाया विमुखीभवति स पतनधर्मा एवेति निश्चप्रचम् । साधनां करोतीति साधुरिति सूत्रं न कदाऽपि विस्मर्तव्यम् ।

भगवद्भावप्राप्तिरेव जीवनस्य परमं ध्येयमिति स्पष्टतयाऽवगम्य तदर्थं जीवनसमर्पणं कृत्वा निष्ठयाऽध्यात्मसाधनां यः परिशीलयति स एव सत्साधुर्नाऽन्यः । साध्य-साधनयोरविकलो बोधस्तदाचरणं चेति साधोरनिवार्यं लक्षणम् । साधुर्नामाऽध्यात्मपुरुषः ।

सत्साधुत्वनिर्णयार्थमितोऽपि बहूनि लक्षणान्यस्यां सूच्यां योजयितुं शक्यान्येव । किन्तु तादृशेन विस्तारेणाऽलम् । अत्र तु प्रधानलक्षणान्येव कानिचिन्निरूपितानि ।

कोऽपि मनुष्यः सर्वथा पूर्णो नैव भवति । तथैव साधुरपि मनुष्यत्वात् सर्वथा पूर्णो न । यत्किञ्चिद् वैकल्यं तु तस्याऽपि भवत्येव । 'यः पूर्णः सर्ववैकल्यरहितश्च भवेत् स एव साधुः' - इति यदि साधोर्लक्षणं कुर्याम तदा न कोऽपि साधुस्तद् यथार्थयितुं समर्थीभवेत् । अतः सामान्यजनवत् साधोः सकाशादपि पूर्णत्वापेक्षा न कर्तव्या ।

किं साधोः काचिद् व्याख्या कर्तुं शक्या ? कठिनमिदं कार्यं, तथाऽपि यथामति प्रयतेमहि-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ये भगवद्भावप्राप्त्यर्थं सर्वसङ्गत्यागेन निष्क्रान्ताः, ये साधनापरायणं जीवनं यापयन्ति, ये भगवच्चेतनास्पर्शलेशमपि प्राप्ताः, ये च निरपेक्षतयाऽन्यसाधकान् यथामति मार्गं दर्शयन्ति ते साधवः, ते हि सत्साधवः ।'

ईदृशैः सत्साधुभिर्भूमिरियं भूषिता ।

(**अखण्ड-आनन्द** नामनि गूर्जरमासपत्रे लेखोऽयं
२००७तमवर्षस्य जूनमासे प्रकाशितः)

## प्रार्थना-भगवांश्च

यदि भगवान् अस्माकं प्रार्थनां शृणोति-स्वीकरोति च, तदा सोऽस्माकं श्रद्धां विश्वासं च वर्धयति ।

यदि स प्रार्थनां श्रोतुं विलम्बयति, तदा सोऽस्माकं धैर्यं वर्धयति ।

यदि स प्रार्थनां न शृणोत्येव तदा मन्तव्यं यत् तस्याऽस्मासु श्रद्धाऽस्ति । स मन्यते यत् - अस्या विपत्तेः पारं वयं स्वयमेव प्राप्तुं समर्थाः - इति ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# कलिकालस्य भरतः

(सत्यघटना)

मुनिरत्नकीर्तिविजयः

सूरतनगरमागतस्य मोहनस्य त्रिंशद्वर्षाणि व्यतीतानि । तदात्वे तु स एकल एवाऽऽगत आसीत् । तत्र च स सर्वथाऽनभिज्ञ आसीत् । यद्यपि साम्प्रतमिव तदा नाऽऽसीदेतावान् वाहनव्यवहारो वा जनानां सम्मर्दो वाऽपि, तथाऽपि सौराष्ट्रवर्तिनस्तस्य नगरादवश्यमेव जनानां सङ्ख्याऽत्राऽधिकाऽऽसीत् ।

सूरतनगरे आगमनानन्तरं तस्य प्रथमः परिचयो रमेशेन सह जातः ।

यस्मिन् यन्त्रागारे मोहनो नियोगं प्राप्तवानासीत् तत्रैव रमेशोऽपि कार्यं कुर्वन्नासीत् । नियोगस्य प्रथम एव दिने यदा भोजनविरामः सञ्जातस्तदा स्वस्वगृहादानीतं भोजनमाहारयितुं सर्वेऽपि कर्मकरा उपविष्टा आसन् । रमेशोऽपि भोजनायोपविष्ट आसीत् । प्रथम एव कवल तेन हस्ते गृहीतस्तावत् तस्य दृष्टि-र्मोहनोपरि पतिता । हस्तौ पादौ च प्रक्षाल्य स एवमेव स्थित आसीत् । तत्पार्श्वे नाऽऽसीत् किमप्याहारयितुम् । तं दृष्ट्वैव सर्वमभिज्ञातवान् रमेशः । बुभुक्षितस्य व्यथां बुभुक्षित एव जानाति किल !

तदभिधानमजानता रमेशेन-भो ! भ्रातः । अत्राऽऽगच्छतु नाम - इत्याकारितः सः ।

मामेवैष आह्वयतीति विज्ञाय मोहनस्तत्समक्षमुपस्थितः । रमेशस्तमिङ्गितेनैव निर्दिष्टवान् यदुपविशतु नाम मया सह भोक्तुम् । सङ्कोचमनुभवन् स व्याजं दर्शितवान् - नैव, धन्यवादः, किन्त्वहमुपोषितोऽस्मि-इति । रमेशोऽप्युदरपूरं प्राप्तुमेव सूरतमागत आसीत् । स्वाभिमानिनो जनस्य पीडां स संवेदयति स्मैव । अतो बलात् तद्धस्तमाकृष्याऽध उपवेशयन् स उक्तवान् - 'अरे ! रिक्तेनोदरेणोपवासो नैव क्रियते रे ! अतः प्रथमं तावदुदरं पूरयतु पश्चादुपवासः करणीयः' इति ।

मोहनः सत्यमेव बुभुक्षित आसीत् । स भोजनायोपविष्टः । भोजनं कुर्वन्तं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं दृष्ट्वा रमेश उक्तवान् - 'मम गृहिण्याः सीताया हस्ते कश्चिच्चमत्कारः प्रतिभासते ।' मोहनस्तदा केवलं स्मितमेव कृतवान् । किन्तु तस्य मुखे सन्तोषः कृतज्ञताभावश्च विलसन्तावास्ताम् ।

तदनु च नित्यमेव रमेशो मोहनायाऽपि भोजनमानेतुं प्रवृत्तः । वस्तुतो न कोऽपि सम्बन्धोऽनयोर्मोहन-रमेशयोर्मध्य आसीत् तथाऽपि-मोहनो मम चिरपरिचितः कश्चिद्-इति सततं रमेशोऽनुभवति स्म ।

अथ रमेशः स्वकीयनिवासस्य समीप एवैकमपवरकं भाटकेन मोहनायाऽपि निश्चितवान् । नित्यमेव रमेशेन सहैव तदानीतमेव भोजनं कुर्वन् मोहनः सङ्कोचमनुभवन्नासीत् । अत एकदा तेन रमेशाय विज्ञप्तं यद् 'भोजनस्य मासिकं किमपि शुल्कं निश्चेतव्यम्' इति । किन्त्वेतच्छ्रवणमात्रेणैव रमेशोऽत्यन्तं व्यथितो जातः कथितवांश्च - 'मोहन ! यदाऽहमस्मिन् नगरे आगतवानासीत् तदा मम कोऽपि नाऽऽसीदेवाऽत्र । किन्तु तव परिचयानन्तरमहमनुभवामि यद् यद्यप्यावां भिन्नमातृकौ स्वस्तथाऽप्यावयोः शरीरे यद् रुधिरं वहति तदेकमेव !' - इति वदतस्तस्याऽक्षिणी बाष्पार्द्रे जाते ।

सूरतागमनानन्तरं वर्षद्वयमध्ये मोहनोऽपि परिणीतो जातः । यस्मिन् वर्षे मोहनस्य परिणयनं जातं तस्मिंश्च वर्षे रमेशस्य पत्नी पुत्रं प्रसूतवत्यासीत् । मोहनः परिणीय पुनश्च सूरतमागत्य स्वपत्न्यै कान्तायै रमेशस्य पत्न्याः सीतायाः परिचयं ददान उक्तवानासीत् - 'इयं मे माताऽस्ति । मम चर्मण उपानहावपि यद्यस्याः कृते कारयेयं तथाऽप्यस्या ऋणं प्रत्यर्पयितुं न शक्यमेव' इति ।

एतच्छ्रुत्वा - 'अरे ! दृष्टो रे महान् ऋणप्रत्यर्पकः ! कान्ते ! मा शृणोत्वस्यैकमपि वचनम्' - इति सीता साक्रोशमुक्तवत्यासीत् ।

तदनु सीता-कान्तयोर्मध्ये मैत्री तथा प्रवृद्धा यथा ते भगिन्यावेव स्याताम् । कान्ताऽप्यादिनं प्रतिकार्यं सीतायै एव परिपृच्छति स्म । भोजनेऽपि मोहनस्य का रुचिररुचिर्वेत्यपि सीतायै एव परिपृच्छ्य रसवतीं निष्पादयति स्म । सीताया बहिर्गमने कान्तैव तत्पुत्रं पालयति स्म, कुपितायां च सीतायां सैव तं लालयति स्माऽपि । स्वपुत्रस्येवैव सा तस्य परिपालनं कुर्वन्त्यासीत् । एतद् दृष्ट्वा सीता यदा कदाचित् सहास्यं कथयति स्माऽपि यत् - 'कान्ते! कदाऽहं तव पुत्रं पालयिष्यामि ?।' एतेन च कान्ता लज्जामनुभवति स्म ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किन्तु तादृशोऽप्यवसर आगतो यदा कान्ताऽऽपन्नसत्त्वा जाता। सायं यदा मोहनो रमेशश्च गृहं प्रत्यागतौ तदा मोहनं समुद्दिश्योक्तवती- 'कदा मिष्टान्नं भोजयति ?' - इति। मोहनः किमपि नाऽभिज्ञातवान्, किन्तु लज्जया रक्तमुखां कान्तां दृष्ट्वा मर्माऽभिज्ञातवान्। माससप्तकं यावत् सीतैव कान्तायाः परिचर्यां कृतवत्यासीत्।

प्रसूत्यै कान्ता पितृगृहं गतवत्यासीत्। तत्र च सा पुत्रयुगलं प्रसूतवती।

तस्मिन्नेव वर्षे मोहनो रमेशश्च नियोगं त्यक्तवन्तौ, सहकारितायां च स्वान्त्र्येण हीरकाणां यन्त्रागारमारब्धवन्तौ। उभावपि वयस्यौ प्रभूतं परिश्रमं कुर्वन्तावास्ताम्। 'मनुष्ययत्न ईशकृपा' इति न्यायात् तयोर्व्यवसायः सवेगं प्रवृद्धः।

प्रसूत्यनन्तरं कान्ता त्रिभिर्मासैर्यदा प्रत्यागतवती तदा तु मोहन-रमेशौ तयोर्भाटकेन गृहीतापवरकौ तत्स्वामिनः सकाशात् क्रीतवन्तावास्ताम्। मासत्रयेणैव तौ सम्यग् धनमर्जितवन्तावास्ताम्। एष च तयोर्विकासः सततं प्रवृत्तः प्रवृद्धश्च। शनैः शनैश्च तयोर्यन्त्रागारेऽनेके कर्मकरा नियोगं प्राप्तवन्त आसन्। व्यवसायकार्यार्थं च ताभ्यां विदेशप्रवासोऽपि कृत आसीत्। अपवरकयोः स्थाने उभयोरपि स्वतन्त्रे गृहे विनिर्मिते आस्ताम्। शीतकयुते द्वे कार्यालये अपि जाते, कार्‌याने अपि च तौ क्रीतवन्तावास्ताम्। पञ्चषैर्वा वर्षैरेव तावपेक्षातोऽप्यधिकं धनसम्पादनं कृतवन्तावास्ताम्।

रमेशस्य पुत्रोऽष्टवर्षीय आसीत्। एकदा रात्रौ रमेशस्याऽसह्या हृदयवेदना समुत्पन्ना। सीता चीत्कारं कुर्वतीव मोहनायाऽऽकारितवती। मोहनोऽपि धावन्नेव समागतः। स्थितेर्गाम्भीर्यमाकलय्य चालकमादिश्य झटिति कार्‌यानमानायितवान्। सत्वरं च रमेशं चिकित्सालयं नीतवान्। किन्तु रमेशः स्वस्थितिं सम्यगभिजानन्नासीत्। स मोहनस्य हस्तं स्वहस्तेन गृहीत्वा- 'अथ सर्वं त्वदधीनं, त्वया सम्यग् निर्वोढव्यम्' इति प्रेरितवान्। चिकित्सालयप्रापणात् पूर्वमेव रमेशो नेत्रे निमीलितवान्। मोहनेन बहु क्रन्दितम्। रमेशस्याऽन्तिमयात्रायां स्वस्कन्धे तच्छवं वहता तेनाऽनुभूतं यत् तस्य पादावशक्तौ जाताविव !

सर्वोऽप्युत्तरविधिः परिसमाप्तः। मोहन उपसीतमागतः। इदानीं व्यावसायिकं सहकारित्वमसौ वियोक्ष्यतीति कल्पयन्तीं सीतामुद्दिश्य हस्तौ संयोज्य मोहनो विज्ञप्तिमिव कुर्वाणोऽवदत्- 'भ्रातृजाये ! सम्प्रत्यहमेकाकी सञ्जातोऽस्मि। किन्तु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमेशो न कुत्राऽपि गतोऽस्ति । स विद्यत एवाऽस्माकं मध्ये । अतो व्यवसायात् सहकारित्वविभजनं मा विचारयतु नामाऽपि !'

तदनु च रमेशो जीवित एवेति व्यवहरन् मोहनः प्रतिवर्षं व्यापारे यो लाभः सम्पद्येत तस्य निश्चितं भागं सीतायै नियतरूपेण ददाति स्मैव । रमेशस्य कार्यालयोऽपि तेन यथावद् रक्षित आसीत् । कार्यानक्रयणस्याऽवसरेऽपि स यानद्वयमेव क्रीणाति स्म । एकं स्वस्य कृतेऽन्यच्च सीतायै समर्पयति स्म । यस्मिंश्च विद्यालये मोहनस्य पुत्रावधीयानावास्तां तत्रैव रमेशस्य पुत्रोऽपि प्रवेशितस्तेन । मोहनः कान्ता चोभे अपि सीतायास्तत्पुत्रस्य च सर्वप्रकारकं योगक्षेमं निर्वहतः स्म । यद्यपि रमेशो नाऽऽसीत् तथाऽपि मोहनः प्रतिवर्षं व्यापारे जायमानमायव्ययादिकं सर्वमपि सीतायै दर्शयन्नासीत् ।

मोहनस्यैतादृशं व्यवहारं दृष्ट्वा सीता सदैव तं कथयति स्म- 'सगोत्रो मम देवरोऽपि यदि स्यात्, कदाचिद् नैतावान् नीतिमान् स्यात्' इति । तदा मोहनः प्रत्युत्तरयति स्म - 'भ्रातृजाये ! भगवत्समक्षमुन्नतमस्तकेन स्थातुमेतत्सर्वं करोमि । अन्यथा मम जीवनस्य गणितमेव मिथ्या स्यात्' इति ।

अथ रमेशस्य पुत्रो युवा जातः । मोहनस्तस्मै व्यवसायं शिक्षितवान् । स्वातन्त्र्येण यदा स व्यापारं निर्वोढुं शक्तो निपुणश्च सञ्जातस्तदन्वेव मोहनो व्यवसायं विभक्तवान् ।

समग्रोऽप्ययं मोहनस्य व्यवहारो रामस्य पादुकां संस्थाप्य राज्यं सञ्चालयन्तं भरतं स्मारयति । कलिकालस्याऽयं भरत एव खलु !

★

***सुजनं व्यजनं मन्ये***
***चारुवंशसमुद्भवम् ।***
***आत्मानं च परिभ्राम्य***
***परतापनिवारणम् ॥***

[सुभाषितरत्नभाण्डागारे]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# जागृतिः

मुनिरत्नकीर्तिविजयः

चैतन्यमहाप्रभु-इत्यस्याऽनेके शिष्या आसन् । रूपगोस्वामी तत्प्रमुख-शिष्येष्वन्यतम आसीत् । पूर्वाश्रमे स मुस्लिमनृपतेर्नियोगमनुतिष्ठन्नासीत् । यद्यपि स उच्चैः पदे नियुक्त आसीत् तथाऽपि सेवकत्वं तु सेवकत्वमेव खलु !

कदाचित् रात्रौ प्रभूता वृष्टिः सञ्जाता । समग्रोऽपि मार्गः कर्दमितो जलपूर्णश्च जातः । एतादृशि च समय एव नृपतेः पुरुषा आगत्य - 'राजा भवन्तं स्मरति' - इत्युक्तवन्तो रूपगोस्वामिने ।

मध्यरात्रस्य समय आसीत् । वृष्टिरजस्रधाराभिः प्रवर्तमानाऽऽसीत् । रूपगोस्वामी राज्ञः प्रमुख आधिकारिक आसीत्, अतस्तस्याऽऽनयनार्थं शिबिका प्रेषिताऽऽसीत् । शिबिकामारुह्य स गृहान्निर्गतः ।

राज्यनिर्मितान्यधिकारिजनानां गृहाणि मार्गस्योभयपार्श्वे विद्यमानान्यासन् । सर्वत्र चाऽधिकारिजना निवसन्त आसन् । एतेष्वेकस्मिन् निवासे पतिपत्न्यौ वसतः स्म । यदा च शिबिका ततो निर्गता तदा कश्चिद् वार्तालापो रूपगोस्वामिनः कर्णगोचरो जातः ।

पतिः पत्नीमुद्दिश्य वदन्नासीत् - "अस्यां घोरायामपि रात्रौ कश्चिद् गच्छति ! को वा स्यादेतादृशि समये ?"

"त्रयो विकल्पा अत्र सम्भाव्यन्ते । श्वा वा स्यात्, चौरो वा स्यात्, राज्ञः किङ्करो वा स्यात्" इति पत्न्युक्तवती ।

पुरुषः स बहिरागत्य निरीक्षितवान् । गत्वा च पत्नीमकथयत् - "नाऽस्ति तत्र शुनकः, नाऽपि च चौरः । एष तु राज्ञः किङ्करः" - इति ।

वार्तालापः समाप्तः । किन्तु वार्तालापमेनं श्रुत्वा रूपगोस्वामिनोऽन्तः-करणं बाढमाहतम् । तस्याऽऽत्मा जागृतोऽभूत् । राजमहालयं प्राप्य राज्ञः समक्षं स्वकीयं निवृत्तिपत्रं समर्पितवान् । ततश्च निर्गत्य चैतन्यमहाप्रभोः शिष्यत्वं सोऽङ्गीकृतवान् ।

□



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# आत्मजागृतिर्जयतु

**मुनिधर्मकीर्तिविजयः**

कश्चित् प्रशान्तवदनो निर्मलनयनश्च साधुः कस्यचिद् ग्रामस्योपवने स्वसाधनायां निजानन्दे च निमग्न आसीत्। तस्य विद्वत्ता कीर्तिश्च सर्वत्र प्रसृताऽऽसीत्। सर्वेऽपि नगरजना वन्दनार्थं तत्पार्श्वे निरन्तरमागच्छन्ति स्म। राजाऽप्येतच्छ्रुत्वाऽऽगतवान्। नमस्कारं कृतवान् सः, किन्तु तन्नमस्कारकरणे ''अहं राजे''ति पदस्याऽभिमानः प्रतिफलति स्म।

साधुनैतज्ज्ञातम्। स तं आशिषाऽनुगृहीतवानुक्तवाँश्च - हे राजन्! भवता स्वबलेन विशालं समृद्धं च राज्यं प्राप्तम्। यदि कदाचिद् भवान् निर्जनवने गच्छेत्, भवन्तं तृष्णा बाधेत, मे प्राणाः गच्छेयुरित्युनुभूयेत, किन्तु कुतोऽपि जलप्राप्तिर्न स्यात्तदा यदि कोऽपि पान्थः जलमानीय ''भवतेऽहं जलं दद्यां यदि भवान् मह्यं राज्यार्धं दद्याद्'' इति कथयेत्तदा भवता किं क्रियेत?

राजोवाच - किं चिन्तनीयम्? तस्मै अवश्यं राज्यस्याऽर्धं दद्याम्।

साधुरवोचत् - राजन्! कदाचिद् मरणान्तव्याधिर्जायेत तदा वैद्यराजो ''यदि मह्यं राज्यार्धं दद्याद् भवान् तर्हि भवन्तमुज्जीवयेय''मिति ब्रूयात्तदा भवान् किं कुर्यात्?

राजाऽऽह - प्राणेभ्योऽधिकं प्रियं किमस्ति! अतोऽवश्यं राज्यार्धं तस्मै यच्छेयम्।

साधुरब्रवीत् - राजन्! यदि किञ्चिज्जलं प्रत्यौषधं च प्रति वा यदि राज्यमपि दातुं भवानुद्युक्तोऽस्ति तर्हि सामान्यस्य राज्यस्यैतस्य प्राप्त्यर्थं रक्षणार्थं च कथममूल्यं जीवनं मुधा गमयति भवान्? कथं चाऽभिमानं करोति?

एतन्निशम्यैव राजा साधोश्चरणयोः पतितवान्। तदैव समीपस्य वृक्षस्योपरि स्थितः पिकोऽवदत्' - 'आत्मजागृतिर्जयतु'।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# वाचश्चमत्कृतिः

मुनिधर्मकीर्तिविजयः

कश्चित् पराक्रमी राजाऽऽसीत् । स दयालुर्निरभिमानी चाऽऽसीत् । प्रजाजनानां सुखे एव स्वसुखमस्तीति मन्वानः स निरन्तरं प्रजाजनानां हितार्थे प्रयतते स्म । प्रजाजना अपि तस्याऽनुशासने शान्तिमनुभवन्ति स्म ।

एकदा सुखेन कालं यापयता तेनैकः स्वप्नो दृष्टो यद्- मम सर्वेऽपि दन्ताः केनचित् त्रोटिता इति । एतादृशं स्वप्नं निरीक्षमाणः सन्नुत्थितवान् चिन्तितवाँश्च स- "यौवनकाले दन्तशून्यवदनोऽहं कीदृशो दृश्येयम् ? मम शोभा का ? एष स्वप्नः शुभोऽशुभो वा भविष्यती"ति ।

स्वप्नफलं ज्ञातुमुत्सुकेन तेन राज्ञा स्वराज्यात् परराज्याच्च सर्वेऽपि विश्वविश्रुता दैवज्ञा आहूताः । नियतकाले ते सर्वेऽपि राजसभायामागतवन्तः । स्वप्नवार्तां तेभ्यो ज्ञापयित्वा स्वप्नफलं पृष्टवान् राजा । एकोऽवदत् - भविष्यत्काले भवतो हानिर्भविष्यतीति सूचयत्येष स्वप्नः । अन्य उवाच- स्वप्नो दुःखदोऽस्ति । भवतः कुटुम्बे मृत्युर्भविष्यतीति । मुखं विकृत्याऽपरेण गदितं- राजन् ! किं कथयानि ? भवतो नयनसमक्षमेव सर्वेऽपि परिवारजना मरिष्यन्ति ।

एतच्छ्रुत्वा सर्वेऽपि राजकौटुम्बिका नगरजनाश्च भयविह्वलाः स्तब्धाश्च जाताः । कौटुम्बिकास्तु रोदितुमारब्धाः । राजाऽप्यधोमुखो भूत्वा ललाटे च हस्तं संस्थाप्याऽऽसीनोऽस्ति । वातावरणे शोक औदास्यं च प्रवर्तते स्म ।

तदैवैको ज्योतिर्विदुत्थितवानुक्तवाँश्च - हे राजन् ! चिन्तां मा कुरु । नैष स्वप्नो भयङ्करफलदोऽस्ति । "भवान् दीर्घायुष्कोऽस्ति, ततो न केऽपि कौटुम्बिकजना भवतो मृत्युं द्रक्ष्यन्ती"ति सूचयत्येष स्वप्नः ।

एतन्निशम्याऽतीवाऽऽनन्दमनुभवता राज्ञा त्वरितमेव स्वकण्ठस्थिता मुक्ताफलमाला निष्कास्य तस्य कण्ठे आरोपिता ।

तदा सर्वेऽपि ज्यौतिषाचार्याः परस्परं मुखं पश्यन्त उक्तवन्तश्च - अहो ! फलादेशस्त्वेक एव किन्तु तत्प्रकटनकरणे कियदन्तरमस्ति ! वागेवाऽमृतमपि विषं करोति तथा विषमप्यमृतं करोति । एषैव वाचश्चमत्कृतिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# अयं तु मूर्खोऽप्यस्ति

मुनिकल्याणकीर्तिविजयः

एकदा एकस्मिन् ग्रामे विवाहप्रसङ्गे जन्ययात्रा प्रवृत्ता । बहवो जना जन्याश्च तत्र सम्मिलिता आसन् । वरोऽपि चाऽश्वारूढः खड्गं धारयन् इतस्ततो निरीक्षमाण आसीत् । सहसा तस्य दृष्टिः पृष्ठतः स्थिते स्त्रीवृन्दे पतिता, तासामुपहासवचनानि श्रुत्वा स सकर्णो जातः ।

काचित् स्त्री अन्याभ्यः स्त्रीभ्यः कथयन्ती आसीत्, ''हलाः ! दृष्टो वा भवतीभिर्वरोऽयम् ? कीदृशो दृश्यते सः ?'' तदाऽन्ययोक्तं, ''दृष्ट एव । कोऽत्र सन्देहः ? मम तु स वृद्ध इवैव प्रतिभाति ।'' अपरयाऽपि कथितम्, ''आम् आम् ! मयाऽपि स प्रातरेव विलोकितः । वयसाऽवश्यं पञ्चपञ्चाशद्वर्षदेशीयः स्यात् ।''

एवमेव च तेषां नर्मालापाः प्रचलन्त आसन् । किन्तु सर्वमप्येतत् श्रुत्वा सञ्जातामर्षो वरः, ''हुम् ! मामपि वृद्धं कथयन्ति एताः !! एष दर्शयामि मम सामर्थ्यम् !'' इति वदन् झटिति खड्गं कोशान्निष्कास्य अश्वाच्चोत्प्लुत्य धावितः, समग्रामपि च जन्ययात्रां प्रदक्षिणीकृत्य पुनरपि स्वीयमश्वमारूढवान् । ततः स तमेव स्त्रीवृन्दं विलोकयति स्म ।

सर्वमप्येतद् दृष्ट्वा तासु स्त्रीष्वन्यतमा उच्चैः कथितवती,

''हलाः ! अयं तु मूर्खोऽप्यस्ति !!''



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कथात्रयी

सा. ऋजुमतिश्रीः

(१)

## अन्तःकरणं नाऽस्ति

शिक्षकोऽपृच्छत् - भो बालकाः ! यूयं किं भगवतो ध्वनिमशृणुत ?

बालका वदन्ति - न, वयं भगवतो ध्वनिं नाऽशृणुम ।

पुनः शिक्षकोऽपृच्छत् - यूयं भगवतः स्पर्शं किमकुरुत ?

बालका वदन्ति - न, वयं भगवतः स्पर्शं नाऽकुर्म ।

पुनः शिक्षकोऽपृच्छत् - यूयं भगवतो दर्शनं किमकुरुत ?

बालका वदन्ति - न, वयं न भगवतो दर्शनमकुर्म ।

शिक्षकोऽवदत् - ततो निश्चितं भवति, यद् भगवानेव नास्ति ।

अथैका निपुणा बालिकाऽपृच्छत् - भो बालकाः । यूयं किं शिक्षकस्याऽन्तःकरणस्य ध्वनिमशृणुत ?

बालका वदन्ति - न, वयं शिक्षकस्याऽन्तःकरणस्य ध्वनिं नाऽशृणुम ।

पुनर्बालिकाऽपृच्छत् - यूयं किं शिक्षकस्याऽन्तःकरणस्य स्पर्शमकुरुत ?

बालका वदन्ति - न वयं शिक्षकस्याऽन्तःकरणस्य स्पर्शं नाऽकुर्म ।

पुनर्बालिकाऽपृच्छत् - यूयं किं शिक्षकस्याऽन्तःकरणस्य दर्शनमकुरुत ?

बालका वदन्ति - न, वयं शिक्षकस्याऽन्तःकरणस्य दर्शनं नाऽकुर्म ।

बालिकाऽवदत् - तेन कारणेन निश्चितं भवति, यत् शिक्षकस्याऽन्तःकरणमेव नास्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२)

## बुद्धिरेव श्रेयसी

नदीतटे छगनश्च मगनश्च गगनश्च मिलिताः ।

छगनादयश्चिन्तयन्ति - वयं महतीं सरितं कथं पारयेम ?

छगनो भगवन्तं प्रार्थयत् -

हे भगवन् ! मम दीर्घौ पादावर्पय, येन सरितं पारयाणि । छगनस्य पादौ दीर्घावभवताम्, नदीं चाऽवतीर्णो छगनः । ततः....

मगनो भगवन्तं प्रार्थयत् - मम दीर्घौ हस्तावेकां च नावमर्पय येन नदीं पारयाणि, मगनस्येष्टं मिलितं, नदीं चाऽवतीर्णो मगनः ।

गगनो विचारयति- दीर्घहस्ताभ्यां दीर्घपादाभ्यां च जीवितव्यस्य काठिन्यं भावि, ततो गगनो भगवन्तं प्रार्थयत् - मे बुद्धिं देहि, येन नदीं पारयाणि ।

ततो गगनो दूरे एकं सेतुं दृष्टवान् ।

गगनः सेतुना नदीमपारयत् ।

★

(३)

## पूर्णिमाया रजनी

एकस्मिन्नगरे कान्हडनामा काष्ठहारको वसति स्म । स प्रतिदिवसं वने काष्ठकर्तनाय गच्छति स्म, काष्ठपुञ्जं च विक्रीय स्वजीवनं निर्वहति स्म ।

एकदाऽस्मिन्नगरे एको मुनिराट् समागतः । तदा कान्हडो विचारयति - अद्याऽहं मुनिराजस्य देशनां श्रोतुं गमिष्यामि । तदा तस्य सहचरः कथयामास - चल, वने काष्ठकर्तनाय गच्छावः । कान्हडः प्रतिकथयामास - अहं नाऽऽगच्छामि अद्याऽहं मुनिराजस्य देशनां श्रोतुं गच्छामि । तस्य सहचरः पुनः कथयामास - यदि त्वं वने नाऽऽगच्छेस्तर्हि बुभुक्षितः स्याः । कान्हडः प्रतिकथयामास-यद्भाव्यं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्भवतु, अहं देशनां श्रोतुमेव गमिष्यामि ।

नगरजना: कान्हडश्च देशनां श्रोतुमगच्छन् । मुनिराज एकं यामं यावद्देशनामदात् । ततः सर्वे नगरजना गताः, केवलं कान्हड उपविष्टः ।

अथ कान्हडो मुनिराजं पृच्छति स्म - अहं धर्मं कर्तुमिच्छामि, कृपया मार्गदर्शनं करोतु । मुनिराजः कथयाञ्चकार- त्वमेकं नियमं गृहाण यत् पूर्णिमाया निशायां ब्रह्मचर्यव्रतं पालनीयम् ।

कान्हडस्तं नियमं प्रतिपन्नवान् पृष्टवांश्च - अहमपठितोऽस्मि, पूर्णिमारजनीं कथं भोत्स्यामि ? मुनिराजः कथयामास- आकाशे पूर्णचन्द्रं दृष्ट्वा त्वं पूर्णिमां भोत्स्यसि । कान्हडो द्वात्रिंशद्वर्षीय आसीत् । तस्य कोऽपि स्वजनो नाऽऽसीत्, धनस्याऽभावे तेनोद्वाहो न कृत आसीत् ।

एकदा कान्हडो वने जगाम । स वर्षाकालस्य कारणेनाऽऽर्द्रं काष्ठपुञ्ज-मानिनाय । तदैकस्य श्रेष्ठिनो मुख्यसेवकेन-अयं चन्दनकाष्ठपुञ्जोऽस्तीति लक्षितं । अतः स कान्हडं वञ्चयित्वा महार्घं चन्दनकाष्ठपुञ्जमल्पमूल्येन गृहीतवान्, श्रेष्ठिने च ज्ञापितवान् । श्रेष्ठी कथयाम्बभूव - त्वयेदमन्याय्यं कृतं, गच्छ, कान्हडं चाऽऽह्वय । आगतं कान्हडं श्रेष्ठी पप्रच्छ - अयं चन्दनकाष्ठपुञ्जो महार्घोऽस्ति, अतस्ते चन्दनकाष्ठपुञ्जस्य भारेण तुल्यं सुवर्णमर्पयामि । किं तत् स्वीकरिष्यसि ? कान्हडः कथयाञ्चकार- आम्.....

कान्हडः कनकपुञ्जं लात्वाऽचलत् । मार्गे स पण्याङ्गनाभवनस्थया वेश्यया दृष्ट आहूय कथितश्च - अद्य निशायां त्वं मया सह क्रीड ।

भवत्वित्युक्त्वा कान्हडेन सर्वमपि स्वीयं सुवर्णं तस्यै दत्तम् ।

वेश्या चिन्तयति - असावुदारो जनोऽस्ति, ततस्तेन सह पत्नीसदृशं व्यवहारं करिष्यामि । पश्चात् पण्याङ्गना कान्हडं स्नपयित्वा चारूणि च वस्त्राणि परिधाप्य पर्यङ्के स्वापितवती । कान्हडो वेश्यया सह गमनायोत्सुकोऽभवत् । वेश्या देहभूषाकरणे मग्नाऽऽसीत् तदा कान्हडस्य दृष्टिर्गगने पतिता । नभसि तेन पूर्णचन्द्रो दृष्टः स्वकीयश्च नियमः स्मृतः । स वेश्याभवनात् पलायनं कर्तुं सोपानश्रेण्याम-वतीर्णः । तदाऽऽगच्छन्ती वेश्या सम्मुखं मिलिता । सा पप्रच्छ - कुत्र गच्छसि ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कान्हडोऽवदत् – ममोदरे पीडा भवति, तेनाऽहं मलविसर्जनाय गच्छामि ।

ततः कान्हडो गृहं गत्वा सुष्वाप । वेश्या बहु प्रतीक्षितवती किन्तु कान्हडो न प्रत्यागच्छत् । अथ सा चिन्तयति स्म – इदं धनं मया न स्वीकर्तव्यम् । किं करोमि ? ततः सा सर्वमपि निवेद्य राज्ञे तत् सुवर्णमयच्छत् ।

राजा विचारयति इदं धनं मयाऽपि न ग्रहीतव्यम् । स पटहमवादयत् – वेश्याया गृहे निशि योऽगच्छत् स राजसभामागच्छतु । पटहं श्रुत्वा कान्हडो भूपतिसमीपमागच्छदकथयच्चाऽहं निशि वेश्यागृहेऽगच्छम् । राजा वेश्यामाह्वयदपृच्छच्च – किमयं जनस्तव गृहे निश्यागच्छत् ? वेश्या कथयामास – आम्...

स कान्हडं पप्रच्छ – त्वमिदं सुवर्णं कया रीत्या आनीतवान् ? कान्हडः कथयामास – श्रेष्ठिना सह चन्दनकाष्ठपुञ्जस्य विनिमयेन मयेदं सुवर्णं लब्धम् । क्ष्मापतिः श्रेष्ठिनमाह्वयति पृच्छति च स्म – भो श्रेष्ठिन् ! – किमयं काष्ठहारकः सत्यं वदति ? श्रेष्ठी कथयामास – आम्...

अथ कान्हडं पप्रच्छ – त्वं वेश्याया गृहात् केन कारणेन पलायनमकरोः ? कान्हड आह – पूर्णिमातमस्विन्यां बह्मचर्यव्रतपालनस्य नियमो मया स्मृतः, तेन मया पलायनं कृतं । राजा हृष्टः । कान्हडाय सर्वं सुवर्णमन्यमुपहारं च दत्तवान् । सर्वे जनाः सानन्दाश्चर्यान्विता बभूवुः ।

अथ कान्हडः सुन्दरं गृहं निर्मापितवान् । उत्तमया कन्यया सहोद्वाहं च कृतवान् । तथाऽपि सदा स पूर्णिमातमस्वत्यां ब्रह्मचर्यपालनं चकार ।

एकदा तस्मिन्नगरे ज्ञानी मुनिः समवसृतः । राज्ञा सह सर्वे नगरजनास्तस्य मुनेर्देशनां श्रोतुमाजग्मुः । देशनानन्तरं राजा मुनिं पप्रच्छ – कान्हडस्योदन्ते वेश्या श्रेष्ठा ? श्रेष्ठी वा श्रेष्ठः ? उत कान्हडः श्रेष्ठ । मुनिः कथयामास–वेश्या, कान्हडः, श्रेष्ठी त्वं चेति सर्वेऽपि श्रेष्ठाः । ततस्ते सर्वेऽपि दीक्षां जगृहुरात्मकल्याणं च चक्रुः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा



# झांसीराज्ञी लक्ष्मीबाई

**राजेशकुमारमिश्रः**

१८५७ तमवर्षस्य क्रान्तेरग्रसारिणी वीराङ्गना लक्ष्मीबाई आसीत् । तस्या माता भागीरथीबाई पिता च मोरोपन्त ताम्बे आस्ताम् । अस्या जन्म वाराणस्यां १९-११-१८३५ तमे दिनाङ्के बभूव । बाल्ये सा स्वमात्रा पित्रा च सह वाराणसीतः कर्णपुरसमीपे विठूरमागता । तस्याः शैशवं विठूरे व्यतीतम् । समये यौवनमारुह्य सा सुन्दरी मनोहरा च जाता । अस्याः सौन्दर्यमवलोक्य झांसीराजो गङ्गाधररावो मोहितो बभूव । तेन तस्या मातापितरौ कथितौ यद् भवन्तौ स्वपुत्रीविवाहं यदि तेन सह करिष्यतः, तर्हि युवयोः पुत्री लक्ष्मी झाँसीराज्यस्य राज्ञी भविष्यति ।

राज्ञो गङ्गाधररावस्य लक्ष्मीविवाहप्रस्तावं श्रुत्वा तौ प्रसन्नौ जातौ । ततः समये सा लक्ष्मीर्गङ्गाधररावेन सह विवाहिता, परं तस्याः कोऽपि सन्तानो नाऽभवत् । १८५३ तमे वर्षे गङ्गाधररावस्य देहावसानानन्तरं सा लक्ष्मीर्झांसीराज्यस्य शासिका बभूव, किन्तु आङ्ग्ल(अंग्रेज)शासकैस्तस्याः शासनाय मान्यता न दत्ता, न च तस्या दत्तकपुत्रो भाविशासको मानितः । ततः सा क्रान्तिकारिणी बभूव । तयोद्घोषणा कृता यत् सा झांसीराज्यमाङ्ग्लशासकाय न दास्यतीति ।

तया लक्ष्म्या महिलासेना स्थापिता, यस्या नाम 'दुर्गादलम्' आसीत् । दुर्गादलस्य नेतृत्वं झलकारीबाई कृतवती । झलकारीबाय्या मुखाकृतिर्लक्ष्मीबाय्या मुखाकृतिसमानाऽऽसीत् । आङ्ग्लैर्यदा झांसी समाक्रान्ता, तदा झलकारीबाई दुर्गादलेन सह तानाक्रान्तवती । युद्धे सा वीरगतिं प्राप्तवती । ततो लक्ष्मीः स्वपुत्रं पृष्ठे बद्ध्वा समरभूमिं गतवती । तत्र आङ्ग्लसेनया सह युद्धं कुर्वती सा कालपीं गता, यत्र तात्याटोपे मिलितः । तेन सह सम्मील्य तया ग्वालियरप्रासादोऽधिकृतः आङ्ग्लैरपि तस्याः पराक्रमः सम्मानितः । अन्ते तया १८-६-१८५८ तमे वर्षे स्वप्राणास्त्यक्ताः । आङ्ग्लसेनापतिना ह्यूरोजेन तस्याः पराक्रमः प्रशंसितः । तेनोक्तम् - 'अत्र या वीराङ्गना सुप्ता, सा वीरेष्वेकवीर आसीत्' ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नर्म-नर्म

**पतिः** अरे ! किंनिमित्तोऽयं पुरस्कारो भवत्या प्राप्तः खलु ?

**पत्नी** प्रलम्ब-भाषणस्पर्धायामभवमहं विजेत्री, तदर्थमेषोऽवाप्तो मया ननु।

**पतिः** ननु विषयः क आसीत् तत्र स्पर्धायाम् ?

**पत्नी** "अल्प-भाषणस्य लाभाः" ॥

▲ ▲ ▲

**ग्राहकः** शुकोऽयं मया ह्यो भवतो हट्टतः क्रीतः । भवता कथितमासीद् यदयं 'वदन् शुको' वर्तते । किन्तु स तु न भाषते किमपि ।

**विक्रेता** मया विक्रयक्षणे किमुक्तमासीत् । स्मरतु भवान् ।

**ग्राहकः** भवता कथितं यदयं यद् यत् श्रोष्यति तत् तत् सर्वमुच्चारयिष्यति । सत्यम् ?

**विक्रेता** सत्यमेव तत् खलु ! किन्त्वत्र समस्यैतावत्येव यदयं बधिरो वर्तते । अहं किं करोमि ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मिन वर्षे प्रदर्शिन्यां कीदृशीनां शाटिकानां प्रदर्शनं भविष्यतीति न ज्ञायते-पत्न्युक्तवती । यत्र कुत्राऽपि गच्छतु नाम; सर्वत्र द्विविधैव शाटिकोपलभ्येते- एका, या भवत्यै न रोचेत । अन्या, यां क्रेतुं मम शक्तिर्न भवेत् ।

◆ ◆ ◆

एका कुमारिका ईश्वरं प्रार्थितवती - 'भगवन् ! नाऽहं मत्कृते किमपि याचे । केवलं मम मातुः कृते एकमुत्तमं जामातारं ददातु' इति ।

ईश्वरस्तस्याः प्रार्थनां श्रुतवान् । तस्या लघुभगिन्या विवाहः सञ्जातः ।

▣ ▣ ▣

**प्रथमः** शीघ्रमहं गृहं जिगमिषामि । मम पत्नी प्रतीक्षारता बुभुक्षिता स्यात् ।

**द्वितीयः** भाग्यवान् रे भवानेतादृशीं पत्नीं प्राप्य, यद् भोजनाय सा त्वां प्रतीक्षते ।

**प्रथमः** अरे, नैवं रे ! न भोजनाय प्रतीक्षते, किन्तु नित्यं रसवती मयैव सज्जीकरणीया किल ! अतः प्रतीक्षते ।

⊙ ⊙ ⊙

विद्यार्थियानस्य समीपात् स्मशानयात्रा निर्गता । विद्यार्थी कश्चित् स्वमित्रं पृच्छति- को मृतः ?

मित्रमङ्गुल्या निर्दिश्योक्तवान् - स सुप्तो दृश्यते किल ? स एव !

◈ ◈ ◈



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकः किशोरः कृपणेन स्वपितृव्येन सह वसन्नासीत् । स पितृव्यस्तु तावान् कृपण आसीद् यत् तं स्वभ्रातृजायोदरपूरं भोजनमपि न ददाति स्म । एवमेव सोऽत्यन्तं कृशकायः सञ्जातः । एकदा द्वावपि गृहे उपविष्टावास्ताम् । तावत् कृशकाय एकः शुनकोऽन्तरागतः । तं दृष्ट्वा पितृव्य उक्तवान्- पश्य रे ! अयं शुनकः कीदृशः कृशकायोऽस्ति !

एषोऽपि स्वपितृव्येण सहैव वसन् स्यादिति प्रतिभाति - भ्रातृजस्त्वरितं कथितवान् ।

◈ ◈ ◈

**यात्रिकः** [पथिकाश्रमस्य (Hotel) व्यवस्थापकाय] अस्ति वासाय कश्चिदपवरको रिक्तः ?

**व्यवस्थापकः** नाऽस्ति ।

**यात्रिकः** यदि प्रधानमन्त्री अत्राऽऽगच्छेत् तर्हि किं भवान् तस्मै अपवरकं दास्यति ?

**व्यवस्थापकः** अवश्यमेव दास्यामि ।

**यात्रिकः** तर्हि कृपया तमेवाऽपवरकं मह्यं दीयताम् । प्रधानमन्त्री नाऽद्याऽऽगच्छति ।

☆ ☆ ☆

**भक्तः** भगवन् ! भवतः कृते कोटिवर्षाणां का गणना ?

**भगवान्** वत्स ! क्षणमात्रम् ।

**भक्तः** कोटिरूप्यकाणां च का गणना ?

**भगवान्** नाणकमात्रमेव ।

**भक्तः** तर्हि भगवन् ! मह्यमेकं नाणकं दीयताम् ।

**भगवान्** क्षणमेकं तिष्ठतु, वत्स !

✸ ✸ ✸



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राकृत-विभागः

# चारुसुहासियाइं

विजयशीलचन्द्रसूरिः

गिरिणिज्झरो

अन्नाया तुह चरिया निक्कारणसोसणं न लाभो य ।
तहवि पराणुवयारं करेसि गिरिझर ! तमसि धन्नो ! ॥१॥

गिरिनिज्झराण नीयागामित्तं खलु सलाहणिज्जं रे ! ।
जं तेसिं जलवहणा संजीवइ सव्ववणराई ॥२॥

कामं बाहिं दीसइ पाहाणविणिम्मिओ कढिणभावो ।
अंतो गिरिस्स किंतु णु वहंति महुणिज्झरा सययं ॥३॥

❁

पव्वओ

सिहरि ! भवउ ते भद्दं जेण तए निम्मविय सरसतिलयं ।
भूमीभालपएसे सोहग्गं अप्पियं तीसे ॥४॥

चंगो नियउच्छंगो गिरिवर ! तुह कयवरोहभरिओ जं ।
सच्चवियं तेण तए 'मणोहरा डुंगरा दूरा' ॥५॥

असि गिरिवर ! उत्तुंगो वणलच्छिअलंकिओ वि तं सहसि ।
तहवि तुह एक्कदोसो तुह सिहरारोहणं महाकढिणं ॥६॥

गिरिवर ! तुह अवयारो सहलो, वणसंपया वि तव उचिया ।
जस्स तुहुस्संगे किल समस्सिया दुब्बला य बलिणो य ॥७॥

उत्तुंगत्तस्स मणे वहसि कहं पव्वइंद भो ! गव्वं ?।
नणु नियपच्छा पेच्छसु तत्थत्थि हु केरिसी गत्ता ! ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नणु पव्वया धराए समत्तणं हेलया हणंतेवं ।
मा मूढ ! चिंतसु जओ धरणीथणमंडला इमे सुहया ॥९॥

मा भंजउ गिरिराया जो होउं भूमिभालतिलयसमो ।
भूमीए सोहग्गं अकलंकमलंकियाइ अप्पेइ ॥१०॥

गिरिरवि गरुओ, गरुओ गुरु वि, गुरुअत्तणे समाणे वि ।
सययं वुड्ढीए तह जंगमभावेण गुरुअणो भिन्नो ॥११॥

'वड्डाणं संनिज्झे को लाभो ?' मूढ ! मन्नसु न एवं ।
छाया य सीयपवणो नणु लब्भंते गिरितलम्मि ॥१२॥

भो गिरिसिहर ! मणम्मी एगल्लत्तस्स वहसि किं खेयं ?।
नणु निच्चेगागित्तं तुंगाणं हवइ विहिलेहो ॥१३॥

भो पव्वय ! गव्वुद्धय ! फोडिज्जंतं निरिक्खि खुद्दनगं ।
कामं हससु, परं सो देव्वं पत्थेइ जोगखेमं ते ॥१४॥

दूरा निरिक्खि सिहरं मा धावसु मुद्ध ! गिरिसमीवम्मि ।
अभिओ उत्तुंगाणं जम्हा निन्नत्तमेव संभवइ ॥१५॥

❁

**सरोवरो**

रत्तुप्पलदलऽलंकियनियबहिरंगं निरिक्खि सरवर रे ! ।
तुज्झ न दप्पावसरो नणु नियमलिणंतरं पेच्छ ॥१६ ॥

किच्चडभरिओ काओ कोमलकमलाण होइ मे निलओ ?।
सर ! नेवं संतप्पसु कमलाणि णु होंति कद्दमम्मि जओ ॥१७॥

सुव्वइ हंस-सरोवर-कमलाणं संगमो पुरा काले ।
इण्हिं पुण बग-दद्दुर-सेवालाणं स संभवइ ॥१८॥

गामम्मि सरं सरम्मि कद्दमो तत्थ धवलकमलवणं ।
अबुहजणाण य गामो विहिवंकत्तं अहो ! असमं ॥१९॥

जत्थ पुरा पउमायरवरम्मि खेलिंसु सुभग ! सियहंसा ।
ही ! तत्थेवज्ज बगा सइरं विहरंति भरियसेवाले ॥२०॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हंसब्भमेण बगुलो निमंतिओ सरवरेण कइया वि ।
तप्पावस्स परिणइं अज्ज वि अणुहोंति जलयरा सव्वे ॥२१॥

❁

सायरो

सायर ! सिणिद्धया तुह अन्ना अन्ना गभीरया चाऽवि ।
जं लहुयं पि खु पोयं अंके धरिऊण गउरवं देसि ॥२२॥
सायर ! सरियानियरो महुरं नीरं निरंतरं खिवइ ।
तुह उयरम्मि, तहावि हु खारत्तं वहसि तं, महच्छरिअं ! ॥२३॥
खारो उयही, तुब्भे मिट्ठजला, तहवि किं नियविलोवो ।
कीरइ तत्थ ? नईओ ! नणु सव्वरसो य सोऽम्ह सव्वस्सं ॥२४॥
न सहइ वियप्पजालं समप्पणं जत्थ कीरए तत्थ ।
इइ सिक्खविउं मन्ने वहइ नई खार-उयहिम्मि ॥२५॥
गुहिरो अगाहमज्झो सायर ! भण्णिज्जसे विसालो य ।
णं असिसयजणहणणं कहमिह सहसे तहवि ताय !? ॥२६॥
भो रयणायर ! निलओ रयणाणं तमसि संसुयं एवं ।
किमिइ अहुणा तडम्मि खु मट्टियपुंजं समुग्गिरसि कालं ? ॥२७॥

❁

दीवदंडो

पोअं अत्थि व नत्थि व अणुसरइ य वा न वा तुह पयासं ।
तहवि सकिच्चमविरयं करोसि तं दीवदंड ! धन्नोऽसि ॥२८॥

❁

नई

सुक्का नई कहं तं ? एवं मा पुच्छ, संगदोसोऽयं ।
नणु सुक्कहियय-लोया मज्झ तडे ताय ! निवसंति ! ॥२९॥

❁

कूवो

मा रडसु सुक्ककूवा ! मन्नंतो जीवियं नियं विहलं ।
रसहीणम्मि जणम्मी भारो च्चिय वारिसंवहणं ॥३०॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिट्ठजलेण सया जो भरिओ आसी तिसं निवारंतो ।
सो कूवो हा ! दीसइ सुक्कोऽसुईकयवरुक्केरो ॥३१॥
चित्ते दट्ठुं कूवं बालो पुच्छिस्सिही नियं पियरं ।
पावा ! किमिणं ? सो वि य मग्गिस्सिही तं खु कोसम्मि ॥३२॥
पुव्विं 'कूवुक्खणणे पुण्णं' ति जयम्मि सद्दहा आसी ।
अहुणा उ कूवपूरणपुण्णं सुपइट्ठियं, जयउ कालो ॥३३॥
पुव्विं महुजलभरिया कूवा आसिंसु जे जगक्खाया ।
जाया दाणिं कडुया ते च्चिय, हा कालमाहप्पं ! ॥३४॥
भो कूव ! तुज्झ पियरा महुजलदाणेण लद्धजसवाया ।
तं कीस देसि कडुयं ? नणु तं ताणेव संताणो ! ॥३५॥
'सुक्का मज्झ जलसिरा जलहीणो हं मरेमि लज्जाए' ।
इय चिंततो धन्नो कूवो, सजला वि नो परे किविणा ॥३६॥
सुइ-सीयल-साउजलं पहिआणऽप्पेसि दाहमुवसमसि ।
कूव ! तुह एक्कदोसो छाहं तत्ताण नो देसि ॥३७॥
कूवस्स निच्चलत्तं केरिसयं जेण तस्स कंठुवरिं ।
झाइंसु साहुणो नणु थिराउ लब्भिज्जए थिरया ॥३८॥
धरिउं कूवसरूवं सक्खं गंगाणई किमवइन्ना ?।
तावं तण्हं च मलं हरेइ पहिआण जो समगं ॥३९॥
णु, खारत्तदुगुंछं मिट्ठत्तमयं च कूव ! वहसि ?।
खारो वि अकूवारो सरणं खलु मीणजाइस्स ॥४०॥
कूवो खणिओ बहुधणव्वएण भूरिस्समेण चेव मए ।
देव्ववसा कडुयतरं विणिग्गयं वारि, कस्स पुक्करुमो ? ॥४१॥

☸

**मुत्ताहलं**

रे कित्तिममुत्ताहल ! झलहल अहिअं तुमं, न मे चिंता ।
मुल्लंकणवेलाए जह न मिलायसि तहा कुणसु किंतु ॥४२॥

☸



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्पो

माणव ! मा मं मारसु पत्थेमि भवंतमम्हि निद्दोसो ।
जइ दोसो विसमेवऽह नणु पासउ नियमणस्स वेरविसं ॥४३॥

रे सप्प ! मुंच दप्पं विसविसए, माणवोऽहिओ तुमओ ।
तं दाढाए डंकसि सो दूरा चेव मारेइ ॥४४॥

दुद्धं पाएंति नरा मं, गरलं हं वमेमि पावो उ ।
इइ भुयग ! मा विमुज्झसु जओ कयग्घाण तं सि उज्झाओ ॥४५॥

पूएंति मणुया सप्पं, मऊरं नउलं व नो ।
अओ सिद्धं जगे नूणं, 'भयं पीईइ कारणं' ॥४६॥

सिढिलो सि किं भुयग रे ! संतासगमवि जणं न किं डससि ?।
नणु मणुयाण कुसलयं डसणे दट्ठूण थद्धो म्हि ॥४७॥

सच्चरस य सप्पस्स य केवल च-पवग्गविरइओ भेओ ।
अन्नह दोन्नि वि मणुयं देंति नवीणं णु अवयारं ॥४८॥

सप्प ! तए सिक्खविया मणुया काउं णु कवडवेरग्गं ।
कंचुयचाए वि विसस्सऽचाइणा अब्भुयं एयं ॥४९॥

नूणं भुयंगदाढा केण वि आयड्ढिया मिलिच्छेणं ।
अन्नह नउलं दट्ठुं न एरिसिं दीणयं लहेज्जेसो ॥५०॥

भुयगा ! भमंतु भुवणे सइरं सुइरं विणा भयं, जम्हा ।
पाहाणीभूओ खलु गरुलो सारंगपाणिणा सद्धिं ॥५१॥

❁

चंदणं

भो चंदण ! सुरही तुह देहम्मि पवट्टए, नणु तओ किं ?।
जइ भुयगा नियनिलयं करेंति तुह खंधगुहिरम्मि ॥५२॥

सप्पा वसंति चंदण ! तुह मूले जणकहा खु सच्चेसा ।
केवलमेए माणवरूवेण चरंति कलिकाले ॥५३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चंदण ! नियसुरहिं भो ! संगोवसु, मा जयम्मि पयडेसु ।
अण्णह सो चाइस्सइ विणासभेरिं तुह अवस्सं ॥५४॥

छेइज्जइ जेणंगं विक्किज्जइ तं च जेण हट्टम्मि ।
सो चंदण ! जइ सुगुणो सुरही, नणु केरिसो हवइ दोसो ? ॥५५॥

❁

सीहो

भो सीह ! निययरज्जं उवेक्खिऊणं किमत्थमडसि बहिं ?।
वड्डाणं नियमेरोल्लंघणमेवेत्थ नणु मरणं ॥५६॥

अइगाढे गहणगिहे सच्छंदं जे वसिंसु केसरिणो ।
ते अज्ज आसयकए भमंति सव्वत्थ, हा विहिविलासो ! ॥५७॥

अइगाढरुक्खजाले वणगहणे जो सयाऽऽसि विहरंतो ।
निब्बंधं, सो पंजरबद्धो सीहोऽहुणा, अहह देव्वं ! ॥५८॥

भो नहपंडिय ! केसरि ! किं गव्वं वहसि तिक्खनहकज्जे ?।
नणु ते तिक्खनह च्चिय हवंति ते हंत मरणकारणयं ॥५९॥

❁

रोज्झो

न हरि नहि हरिणा वि हु करिणो नहि नेव संति सद्दूला ।
एण्हिं इह वणगहणे रायपए रोज्झडाण अहिगारो ॥६०॥

❁

मेंढो

मेंढपवाहं दट्ठुं धम्मंधा सुमरिया मए मणुया ।
जे चक्खूणि निमीलिय पडंति अग्गेसराणुवरिं ॥६१॥

❁

वसहो

खेत्तम्मि धवलजुम्मं घुम्मइ भूमीतलं सु करिसंतं ।
मन्ने माउच्छंगे खेलंतं बालवरजुअलं ॥६२॥

मा धवल ! मा पयंससु नियदेहं, मा पसंस नियरूवं ।
को जाणइ पडइ कया तुहोवरिं सोणियकुदिट्ठी ? ॥६३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रे वसह ! किं पसीयसि गलघंटरवं सुणेत्तु नियचित्ते ? ।
नणु एस एव घंटो तुह बंधणपहरिओ होइ ॥६४॥

❋

रासहो

रासह ! जइ कंखसि तं वसहसमाणं पयं अणुहवेउं ।
ता पढमं मोणवयं धर, मा धर पामरं च मणं ॥६५॥

❋

सुणओ

भो सुणय ! भसउ भसउ जह गामडियं तहेव साहुं पि ।
तुह पासाओ साहू सिक्खउ समदंसणं कामं ॥६६॥

सुणओ ण मारिअव्वो जेण भसंतेण सयलरत्तीए ।
वीससणिज्जतं तह अपमाओ दंसिओ पयडं ॥६७॥

सुणयस्स भवउ भद्दं जग्गंतस्सेह जस्स अंधारे ।
चोरो वा पावं वा नो लहइ पविसिसिउं निलए ॥६८॥

साणस्स पेच्छ दप्पं सयडतले संठिअस्स दित्तस्स ।
जो मन्नइ सयडमहं उप्पाडेमि य चलावेमि ॥६९॥

सुणयस्स य सुयणस्स य नणु पेच्छह सरिसयं महं एक्कं ।
दोन्नि वि पोक्कारेउं अणिसं वारेंति पिसुणाइं ॥७०॥

तिणपूलओहउवरिं चिट्ठं बिट्ठस्स दुट्ठसाणस्स ।
पस्सह भक्खइ न सयं न देइ गावीण भक्खेउं ॥७१॥

❋

हंसो

'हंसो भक्खइ मुत्ताहलाइं' इइ विस्सुयं जए ताय ! ।
तं रे ! किमु चुणसि कणं ? नणु हंसो हं कलिजुगस्स ॥७२॥

'कागा वि हुंति सेया' इइ चिंतिय तवसि हिमनगे गंतुं ।
उज्जमियं हंसेहिं, मन्ने सोवन्नवन्नत्थं ! ॥७३॥

❋



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| बगो | वीसत्थाणं वंचणकुसलो को मारिसो ? इइन चिंत ! ।<br>तव दप्पदलणनिउणाण धुत्ताण बग ! जगं भरिअं ॥७४॥ |
| दद्दुरो | मा कुरु दद्दुर ! चित्तं कमलिणिपत्तम्मि मित्त ! उवविसिउं ।<br>चिररक्खिअमेअं खलु धवलकलहंसबालखेलत्थं ॥७५॥ |
| मीणो | भो मीण ! दीणभावं मा गा बगवंचणापराहीण !।<br>नणु इह तुह अवराहो जं धम्मं पेच्छ वीससिस ॥७६॥ |
| कागो | होसि तमप्पियवयणो तहवि हु नणु काग ! किं रटसि विरसं ?।<br>सच्चं होइ कठोरं इय जाणावेमि ताय ! मणुयाणं ॥७७॥ |
| कोइलो | जा कागाणं सत्ती अवसउणे निद्दभंगकरणे य ।<br>सा कोइलाण नत्थि तहवि हु सिद्धोऽत्थि कोइलो, चित्तं ! ॥७८॥<br>कोइल ! एत्थ न मुज्झसु न एस अंबोऽत्थि किंतु बब्बूलो ।<br>रेहंति कंटइल्ला वि निक्कुंटगनियवणम्मि नणु ताय ! ॥७९॥ |
| बगो | हंसो संसिज्जइ, नहि अहं कयावि त्ति बग ! न कुरु रोसं ।<br>आयारेण वि धवला जे ते चेवेह संसणिज्जा भो ! ॥८०॥ |
| कोइलो | कोइ न सुणइ, पसंसं न कुणइ य, इय चिंतिउं न वह मोणं ।<br>कोइल ! जं सुयणाणं, एयं लिहियं खु नियनिलाडम्मि ॥८१॥ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिंगो

सूरस्स वीससमु मा भो भिंग ! परागरेणुआसत्त ! ।
जइ अब्भावरिओ सो कमलविबोहगकरे न पयडेइ ॥८२॥

आयंसे नियरूवं निरिक्खिउं भवसि किं भमर ! मूढो ?।
नणु आयंसो छलणा देक्खावइ एस सं पि परं ॥८३॥

रे भिंग ! गुंजणं तव सोउं नलिणी तहा समुल्लसिया ।
जह हंससंगमे वि न नाडवि नलिणुग्गमे वि कया ॥८४॥

भमर ! किमु गुमगुमायसि वियसियसियउप्पलाणि संपप्प ?।
सायं तेसि सरूवं थद्धीहोहिसि निरिक्ख नणु ॥८५॥

कमलवणं मउलिज्जउ कामं सूरत्थगमणवेलाए ।
किंतु कमलगयभमराणं रसमूढाण किं होही ? ॥८६॥

☸

विहगा

सइरं डयंतु विहगा अज्ज वि आगासमत्थि निद्दोसं ।
पच्छा कारक्खाणे विणिम्मिए दूसणस्स नो जाणे ॥८७॥

☸

खज्जोया

वासारत्तिम्मि अहो ! खज्जोयगणाण विलसियं दट्ठुं ।
तक्केमि तारयगणो सजीवणीहोउ किमिह संपत्तो ? ॥८८॥
(ण्हवणत्थं किमिह संपत्तो ?)

☸

चंदो

भो सोम ! खज्जुआणं उज्जोअं पेच्छ मा कुरु पमायं ।
अन्नह लोयस्स तमोलोयक्खेवणकलंकलित्तो सि ॥८९॥

☸

सूरो

सूरस्स दप्पतिक्खं रूवं अणुभूय हसइ दिणचंदो ।
दिवसे हं जह गगणे देक्खिज्जिस्सइ तहा निसि खु सूरो ? ॥९०॥

सूरो पहसइ सोमं नणु तेअं जीविअं महंताणं ।
रत्तिम्मि व दिवसम्मि व किं कज्जं निप्पयासेहिं ? ॥९१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निच्चं उदेमि अहयं तहवि तमं निच्चमेच पसरइ हा ! ।
इइ चिंता तुह नऽग्घइ दिणयर ! तमवारणं खु ते धम्मो ॥९२॥

❁

**मालिओ**

मा मालिय ! मा सोयसु 'मिच्छा वुच्छेसु उज्जमो मे'त्ति ।
खाणू वि रणपएसे मन्निज्जिस्सइ जओ अंबो ॥९३॥

❁

**गुलकुसुमं**

बहुपेम्मलालियं पि हु कंटगसंगं न मुयइ गुलकुसुमं ।
इय मा वह खेयं इह सज्जण ! सुहवं खु कंटगाइण्णं ॥९४॥

❁

**मोग्गरफुल्लं**

जत्थ न तुह उवभोगो पूआकज्जम्मि नेव उवओगो ।
मोग्गरफुल्लोप्फुल्लसि तत्थ वि तं, धी ! तव विवेयं ॥९५॥

❁

**वणपुप्फं**

जइ वि सि सुरहि सुवण्णं फुल्लं मणमोहगं च वणपुप्फ !।
तहवि न जा विक्किज्जसि हट्टे ता नत्थि किंपि तुह मुल्लं ॥९६॥
मउलिज्जइ निसि नलिणं संकोइज्जइ दिणे तहा कुमुयं ।
अहनिसमवि जं वियसइ दंसिज्जह सज्जणा ! तयं कुसुमं ॥९७॥

❁

**कमलं**

भो कमल ! सरल-कोमल ! जलबाहिं जाहि मा सुहय ! सहसा ।
जं सव्वत्थ वि लोए भरिया खलु कंटगा तिक्खा ॥९८॥
वियसिय-सियकमल ! अरे ! सूमालमुणालदंडदुल्लिय !।
मा वह गव्वं, चिंतसु 'उस्सूरे का गई मज्झ ?' ॥९९॥
जं जं कोमलमिहइं तं उच्छेइज्जए निसंसेहिं ।
ता रत्तुप्पल ! धरसु कढिणत्तं थोवमवि सुहय ! ॥१००॥
रत्तं वा नीलं वा सेयं हरियं व होउ जं तं वा ।
सुण भो कमलकुसुम ! तुह एत्थुवओगो नराण नहि को वि॥१०१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कयग-कमलेहि सरिए पओयणे किमिति कमलखंडाइं ।
वियसंति य विलसंति य निक्कारणमिइ न बोहेमो ॥१०२॥
उप्पज्जंति खु अहुणा किरणप्फासं विणा कुमुय-नलिणा ।
ता चंद ! सूर ! तुब्भं किरणा अन्नत्थ लग्गंतु ॥१०३॥
जम्मोऽम्ह मलिणनीरे मणुआणं नोवओगिणो यऽम्हे ।
एवं न कमल ! सोयसु वयणं केणोवमिज्जइ विणा तं ? ॥१०४॥
पढमं रत्तुप्पलवणसंबोहोवायमन्नमन्निसिउं ।
तत्तो सूरस्स बुहा ! चंडत्तं खलु विगोवंतु ॥१०५॥

❁

अंबो

अंबोचरि कागेहिं नियनिलया निम्मिया निरवरोहं ।
निंबस्स संगई नणु मन्ने एयम्मि कारणयं ॥१०६॥
(संगो निंबस्स कओ नूणं, अंबेण, अन्नहा नेवं) ॥
देमि फलाणि, खमामि य तावं, छायं करेमि संताणं ।
तहवि जणो मं छेयइ किं परमत्थस्स फलमेयं ? ॥१०७॥
जइ निंब ! अंबगव्वं चूरेउं तं मणम्मि इच्छेसि ।
ता पढमं कागगणं उत्तारसु नियसीसाओ ॥१०८॥
भो अंब ! नियखंभे आरोहं देसु मा गलोइस्स ।
नणु एसा तुह जम्मं करिस्सए सव्वहा कडुयं ॥१०९॥
भो अंब ! सुमर पढमं अंबत्तणमाइमं वहिअदंतं ।
तत्तो नियमहुरत्तणवत्तं सव्वत्थ गाएसु ॥११०॥

❁

पायवो

रे पायव ! विच्छाओ हवसि कहं संखयस्स वेलाए ?।
आउक्खए वि सुयणा नणु नियपयडिं न मुंचंति ॥१११॥
उवजुज्ज मज्झ सव्वं 'सिद्धे कज्जे गयऽज्ज अन्नत्थ ।
सउण'त्ति दुम ! न सोयसु परोवयारीण खलु गई एसा ॥११२॥

❁



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बब्बूलो

बब्बूलमंडवं पहि सूरातववारगं निरिक्खऽज्ज ।
तक्केमि दुज्जणजणो न सव्वया कुणइ हाणिमेव बुहा ! ॥११३॥

मा कुरु गाढमुवेहं वणपालग ! वणदुमाण रक्खम्मि ।
अन्नह बब्बूलाणं पवत्तिही काणणम्मि ईसरियं ॥११४॥

वड-पिप्पल-सहयारा उच्छेइज्जंति जत्थ देसम्मि ।
वड्ढंतुन्नयसिरसा बब्बूला तत्थ ही ! किमच्छरिअं ? ॥११५॥

सव्वत्थ पेच्छ वुड्ढि समुन्नइं चेव कंटइल्लाणं ।
मन्नंति सफलरुक्खा नियवंझत्तम्मि साफल्लं ॥११६॥

नियकंटगेहिं डंससि सव्वेसिं देसि नावि वीसामं ।
छांहे कंटगभरिए बब्बुल ! तुहजीवणं धिद्धी ! ॥११७॥

इंधणगं मणुआणं देमि, तहा दंतधावणं रे रे ! ।
भोअणमुट्टाईणं वद कह मह जीवणं विहलं ? ॥११८॥

पहिअ ! पह-संत ! दट्ठुं मग्गम्मी बब्बुलं न वह खेयं ।
होंति जओ कलिकाले मग्गा कंटगिसमाइण्णा ॥११९॥

एगंतेणं सुयणा ! निंदेयव्वो न होइ बब्बूलो ।
जं तस्सावि च्छाया कंटगरहिया य सीया य ॥१२०॥

❁

कमलिणी

अणुरत्ते वि हु गाढं भमरम्मि निरंतरं रुणझुणंते ।
मज्झत्थेव कमलिणी चिट्ठइ, ही ! केरिसी सुनिग्घिणया ! ॥१२१॥

❁

वेलुकणा

सूरकरमग्गपडिआ वेलुकणा तारिसं चमक्कंति ।
जह मोत्तियं पि लज्जइ सुवण्णअंगुट्ठियाजडिअं ॥१२२॥

❁

हरिणंको

कुयणाणेसेव ठिई साधारं ते सया खरंटेंति ।
हरिणेणासयदाया कलंकिओ पेच्छ हरिणंको ॥१२३॥

❁



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पहो

कामं तं दिग्घो पह ! रायपहनामधेअजुग्गो अ ।
तह वि पहिआण विरहे निरत्थयं तावगं सयलं ॥१२४॥

❁

दुज्जणा

भो दुज्जणा ! जहिच्छं तोडंतु घडंतु वा जगं, जेण ।
बंभो सज्जणकज्जे गहियनिवित्ती गओ सगिहं ॥१२५॥

❁

पहिओ

कासारा किंसारा कूवा अंधा नईउ सुक्कजला ।
मन्ने पहिआणं किल अतित्तिकम्मं उदयपत्तं ॥१२६॥

❁

मणूसा

पत्थरकए लहुनगा फोडिज्जंतीह जलकए धरणी ।
गहणवणा कट्ठकए रक्खसकिच्चं हहा ! मणूसाणं ॥१२७॥

❁

कारेल्लयं

कडुयत्तणं पि सुगुणो पसंसणिज्जो कयाइ दीसेइ ।
कारेल्लयकडुयरसो जं महुमेहं विणासेइ ॥१२८॥

❁

सुन्नट्ठाणं

भग्गं सुन्नट्ठाणं निरिक्खिउं हससु मा अरे मूढ ! ।
जाणासि ताव किं नो 'जो जायइ जाइ सो' इमं नियमं ? ॥१२९॥
(भो मेघ ! सक्कदत्तो, कत्थ पलत्तो तुह विवेगो ? ॥)

❁

विन्नाणं

पुव्विं वणवासीणं पाणीणं संखओ पयइविहिओ ।
इण्हिं पुण विन्नाणं मणुया य करेंति तं कम्मं ॥१३०॥

❁

समदिट्ठी

भयवं ! जत्थ न पूया न पूयगो दंसगो व को नत्थि ।
तत्थवि तं उवविसिओ अहो ! महंताण समदिट्ठी ॥१३१॥

❁



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| मेघो | काले नेव वरिससि तहा अकाले करेसि मा वुट्ठिं ।<br>भो मेघ ! किं न दत्तो सक्केणेसिं पि तुह विवेगगुणो ? ॥१३२॥<br>महुरे महुरो कडुए कडुओ खारो तहा य खारे तं ।<br>होसि जलय ! केणेसो नणु सिक्खविओ तुह विवेगो ? ॥१३३॥<br>तुह मेघ ! का कुसलया फुल्लावेंतस्स सयलवणराइं ।<br>जइ न करीरं सुक्कं वियसावसि तुज्झ सम्मुहम्मि ठियं ॥१३४॥ |
| सूरो | किंसुअमुहसरिसारुणवयणे सूरे समुग्गए वि अहो ।<br>जइ नलिणं मलिणिज्जइ तो नियई कं सरणमेउ ? ॥१३५॥ |
| कयग्घया | मा कालिदास ! लज्जसु नियमासयछेयणं सरिय हियये ।<br>तुह चेट्ठा गयलज्जं अज्जवि अस्सिज्जई बुहेहिं जं ॥१३६॥<br>रे रे कयग्घया ! तं केरिसलोयंपिणत्तमुव्वहसि ? ।<br>झंखंति पुत्तदारा सीसा सयणा य जेण तुमं ॥१३७॥ |
| कासारो | पक्खिगणाण उवेक्खं समिक्ख कासार ! सार मा अंसू ।<br>एसेच लोगनीई 'जं रित्ता णेव दट्ठव्वा' ॥१३८॥ |
| सज्जणो | भो सज्जण ! मा सोयसु नियवुच्छं पेच्छ कडुफलं, जेण ।<br>अंबब्भमेण निंबो नियगेहे वाविओ तुमए ॥१३९॥ |
| पिवीलिया | अहमेगया समग्गं सक्करखंडं नयामि नियनिलए ।<br>इय चिंतिरी पिवीली गसिया कालेण, अच्छरिअं ॥१४०॥ |
| विही | जइ गव्वमुव्वहसि इय 'जं धारेमीह तं करेमि' विहे ! ।<br>तो कंटगकिण्णे कुरु बब्बुलरुक्खे महुफलं भो ! ॥१४१॥ |
| पिवीलिया | पडिवक्खहत्थिकुंभत्थलाण विप्फोडणे कयंतो जो ।<br>सो मयमत्तो वि गओ पिवीलियाणं कहं रंको ? ॥१४२॥ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# पाइयविन्नाणकहा

आचार्यविजयकस्तूरसूरिः

## (१) अवियारिआएसे नरिंदस्स कहा

**अवियारिय-आएसो, सप्पाणंमि पडेज्ज वि ।**
**साऽऽएसं कुंभगारं च, मुंचित्था निवई जहा ॥**

कत्थ वि नयरे एगेण नरिंदेण आएसो दिण्णो - "गाममज्झे एगो देवालओ अत्थि। पुरीए माहणा वा वइस्सा वा खत्तिया वा सुद्दा य वा नयरवासिणो जे लोगा संति तेहिं देवालए पविसिअ देवं वंदित्ता गंतव्वं, अन्नहा तस्स वहो भविस्सइ" ।

एगो कुंभयारो तमाएसं अजाणिऊण गद्दहमारुहिअ हत्थे लगुडं गिण्हित्ता महाराय व्व गच्छइ । तेण देवालए सो देवो न वंदिओ । तओ रुट्ठा सुहडा तं गिण्हिऊण नरिंदग्गओ ठविअवंता । नरिंदेण तस्स वहो निद्दिट्ठो । वहत्थंभे सो नीओ।

मरणकाले तत्थ मरणं विणा पत्थणातियं किज्जइ, पत्थणातिगं पूरिऊण वहिज्जइ, एवं नियमो निवेण कओ अत्थि। तदा सो कुंभारो वि पुच्छिज्जइ तए पत्थणातिगे किं जाइज्जइ, तेणं उत्तं- 'अहं नरिंदस्स समीवे मग्गिस्सामि'। सो तत्थ नीओ। नरिंदेण 'पत्थणातिगं मग्ग' त्ति कहिअं।

सो कहेइ- 'एगं तु मज्झ गेहे अहुणा कुडुंबभोयणत्थं पन्नरलक्खरुप्पगाइं पेसेह, बीअं तु जे जणा बंदीकया ते सव्वे मोएह। निवेण सव्वं कयं। तइअपत्थणावसरे तेण सहमज्झत्थिअनरिंदपमुहसव्वजणाणं लगुडेण पहारतिगकरणाय आएसो मग्गिओ।

रण्णा चिंतिअं - 'अहं किं करोमि ?, एसो थूलो, दंडो वि थूलो, एगेण पहारेण अहं मरिस्सामि'। तओ 'अजुत्तो एसो आएसो' इअ चिंतित्ता वंदणाएसो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्कासिओ। उवरिं दाणमहिअं तस्स अप्पित्ता तस्स बुद्धीए संतुट्ठेण निवेण समाणं गिहे मोइओ। एवं अविआरिओ आएसो कया वि अप्पवहाए होइ।

उवएसो-

अवियारिअकज्जस्स, पासित्ता अप्पियं फलं।
कयाई न तहा कुज्जा, जइ तुम्हे सुहेच्छवो ॥

◎

## (२) सीलवईए कहा

**कालो गओ जो धम्मंमि, सो णेओ सहलो च्चिअ।**
**निप्फलो सयलो सेसो, वहू एत्थ निदंसणं ॥**

कम्मि नयरे लच्छीदासो सेट्ठी वरीवट्टइ। सो बहुधणसंपत्तीए गव्विट्ठो आसि। भोगविलासेसु एव लग्गो कया वि धम्मं न कुणेइ। तस्स पुत्तो वि एयारिसो अत्थि। जोव्वणे पिउणा धम्मिअस्स धम्मदासस्स जहत्थनामाए सीलवईए कन्नाए सह पाणिगहणं पुत्तस्स काराविअं।

सा कन्ना जया अट्ठवासा जाया, तया तीए पिउपेरणाए साहुणीसगासाओ जिणेसरधम्मसवणेण सम्मत्तं अणुव्वयाइं च गहीयाइं, जिणधम्मे अईव निउणा संजाआ। जया सा ससुरगेहे आगया, तया ससुराइं धम्माओ विमुहं दट्ठूण तीए बहुदुहं संजायं। 'कहं मम नियवयस्स निव्वाहो होज्जा ?, कहं वा देवगुरुविमुहाणं ससुराईणं धम्मोवएसो भवेज्जा ?' एवं सा वियारेइ।

एगया 'संसारो असारो, लच्छी वि असारा, देहोवि विणस्सरो, एगो धम्मो च्चिय परलोगपवन्नाणं जीवाणमाहारु'त्ति उवएसदाणेण नियभत्ता जिणिंदधम्मेण वासिओ कओ। एवं सासुमवि कालंतरे बोहेइ। ससुरं पडिबोहिउं सा समयं मग्गेइ।

एगया तीए घरे समणगुणगणालंकिओ महव्वई नाणी जोव्वणत्थो एगो साहू भिक्खत्थं समागओ। जोव्वणे वि गहीयवयं संतं दंतं साहुं घरंमि आगयं दट्ठूण आहारे विज्जमाणे वि तीए वियारियं- 'जोव्वणे महव्वयं महादुल्लहं, कहं एएण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयंमि जोव्वणत्तणे गहीयं ?'त्ति परिक्खत्थं समस्साए पुट्ठं - 'अहुणा समओ न संजाओ, किं पुव्वं निग्गया ?'। तीए हिययगयभावं नाऊण साहुणा उत्तं-'समयनाणं-कया मच्चू होस्सइ त्ति-नत्थि, तेण समयं विणा निग्गओ'। सा उत्तरं नाऊण तुट्ठा।

मुणिणा वि सा पुट्ठा 'कइ वरिसा तुम्ह संजाया' ?। मुणिस्स पुच्छाभावं नाऊण वीसवासेसु जाएसु वि तीए 'बारस वासत्ति' उत्तं। पुणरवि 'ते सामिस्स कइ वासा जाय'त्ति पुट्ठं। तीए पियस्स पणवीसवासेसु जाएसु वि 'पंच वासा' उत्ता, एवं सासूए 'छम्मासा' कहिया। ससुरस्स पुच्छाए सो 'अहुणा न उप्पन्नो अत्थि'। एवं वहू-साहूणं वट्टा अंतठिएण ससुरेण सुआ। लद्धभिक्खे साहुंमि गए सो अईव कोहाउलो संजाओ, जओ पुत्तवहू मं उद्दिस्स न जाउ त्ति कहेइ।

रुट्ठो सो पुत्तस्स कहणत्थं हट्टं गच्छइ, गच्छतं ससुरं सा वएइ- 'भोत्तूणं हे ससुर ! तुं गच्छसु।' ससुरो कहेइ- 'जइ हं न जाओ म्हि, तया कहं भोयणं चव्वेमि-भक्खेमि' इअ कहिऊण हट्टे गओ। पुत्तस्स सव्वं वुत्तंतं कहेइ- 'तव पत्ती दुरायारा असब्भवयणा अत्थि, अओ तं गिहाओ निक्कासय'। सो पिउणा सह गेहे आगओ। वहुं पुच्छइ- 'किं माउपिउणो अवमाणं कयं ?, साहुणा सह वट्टाए किं असच्चमुत्तरं दिण्णं' ?। तीए उत्तं- 'तुम्हे मुणिं पुच्छह, सो सव्वं कहिहिइ'।

ससुरो उवस्सए गंतूण सावमाणं मुणिं पुच्छइ- 'हे मुणे ! अज्ज मम गेहे भिक्खत्थं तुम्हे किं आगया ?'। मुणी कहेइ- 'तुम्हाणं घरं न जाणामि, तं कुत्थ वससि ?' सेट्ठी वियारेइ 'मुणी असच्चं कहेइ'। पुणरवि पुट्ठं 'कत्थ वि गेहे बालाए सह वट्टा कया किं ?'। मुणी कहेइ- 'सा बाला जिणमयकुसला, तीए मम वि परिक्खा कया। तीए हं वुत्तो "समयं विणा कहं निग्गओ सि"। मए उत्तरं दिण्णं-समयस्स 'मरणसमयस्स' नाणं नत्थि, तेण पुव्ववयंमि निग्गओ म्हि। मए वि परिक्खत्थं सव्वेसिं ससुराईणं वासाइं पुट्ठाइं। तीए सम्मं कहियाइं'। सेट्ठी पुच्छइ- 'ससुरो न जाओ इअ तीए किं कहियं ?'। मुणिणा उत्तं- 'सा चिय पुच्छिज्जउ, जओ विउसीए तीए जहत्थो भावो नज्जइ'।

ससुरो गेहं गच्चा पुत्तवहुं पुच्छइ- 'तए मुणिस्स पुरओ किमेवं वुत्तं- "मे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ससुरो जाओ वि न''त्ति । तीए उत्तं - 'हे ससुर ! धम्महीणमणूसस्स माणवभवो पत्तो वि अपत्तो एव, जओ सद्धम्मकिच्चेहिं सहलो भवो न कओ सो मणूसभवो निप्फलो चिय । तओ तुम्ह जीवणं पि धम्महीणं सव्वं गयं । तेण मए कहिअं- मम ससुरस्स उप्पत्ती एव न ।

एवं सच्चत्थनाणे तुट्ठो धम्माभिमुहो जाओ । पुणरवि पुट्ठं- 'तुमए सासूए छम्मासा कहं कहिआ ?' तीए उत्तं- 'सासुं पुच्छह' । सेट्ठिणा सा पुट्ठा । ताए वि कहिअं- 'पुत्तवहूए वयणं सच्चं, जओ मम जिणधम्मपत्तीए छम्मासा एव जाया, जओ इओ छम्मासाओ पुव्वं कत्थ वि मरणपसंगे गया । तत्थ थीणं विविहगुणदोसवट्टा जाया । एगाए वुड्ढाए उत्तं ''नारीण मज्झे इमीए पुत्तवहू सेट्ठा । जोव्वणवए वि सासूभत्तिपरा धम्मकज्जंमि सएव अपमत्ता, गिहकज्जेसु वि कुसला नऽन्ना एरिसा ! । इमीए सासू निब्भग्गा, एरिसीए भात्तिवच्छलाए पुत्तवहूए वि धम्मकज्जे पेरिज्जमाणावि धम्मं न कुणेइ'' । इमं सोऊण वहूगुणरंजिआ तीए मुहाओ धम्मो पत्तो । धम्मपत्तीए छम्मासा जाया, तओ पुत्तवहूए छम्मासा कहिया, तं जुत्तं' ।

पुत्तो वि पुट्ठो, तेण वि उत्तं- 'रत्तीए सययधम्मोवएसपराए भज्जाए ''संसारासारदंसणेण भोगविलासाणं च परिणामदुहदाइत्तणेण, वासानईपूरतुल्ल-जुव्वणत्तणेण य देहस्स खणभंगुरत्तणेण जयंमि धम्मो एव सारु''त्ति उवदिट्ठो हं जिणधम्माराहगो जाओ, अज्ज पंच वासा जाया । तओ वहूए मं उद्दिस्स पंचवासा कहिया, तं सच्चं' ।

एवं कुटुंबस्स धम्मपत्तीए वट्टं, विउसीए य पुत्तवहूए जहत्थवयणं सोऊण लच्छीदासो वि पडिबुद्धो वुड्ढत्तणे वि धम्मं आराहिअ सग्गइं पत्तो सपरिवारो ।

उवएसो-

सीलवईअ दिट्ठंतं, ससुराइविबोहगं ।
सोच्चा धम्मेण अप्पाणं, वासिअं कुण सव्वया ।।

◎



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (३) दाणंमि थेर-थेरीणं कहा

**दायव्वं निअहत्थेण, परो दाहिइ वा न वा ।**
**वुड्ढदंपइदिट्ठंतो, विक्खाओ एत्थ वुच्चइ ॥**

एगंमि नयरे निद्धणो थेरो वणिओ अपुत्तो अत्थि । नियडीकुसला तस्स थेरी भज्जा दुट्ठा विज्जइ । तेण वणिएण निद्धणेण कया वि दाणं न दिण्णं । एगया तेण 'दाणेण विणा परलोगे सुहं न होही, तेण किंचि वि इह भवे दाणं दायव्वं' ति वियारिऊण तस्स घरे एगो जच्चतुरंगमो अत्थि, तस्स विक्कएण जं दव्वं होहिइ, तं धम्मत्थं मए अप्पियव्वं । एवं चिंतमाणस्स कियंतो कालो गओ । जया तस्स मरणसमओ आगओ, तया महाजणं बोल्लविऊण कहिअं- ''मम मरणाओ पच्छा मम भज्जा एयं जच्चतुरंगमं विक्केऊण जं दव्वं पाविस्सइ, तं दव्वं परलोगसुहाय तुम्हाणं दास्सइ । तं दव्वं तुम्हेहिं सुहकम्मंमि निओइयव्वं'' ति कहिऊण सो मरणं पत्तो ।

तस्स वुड्ढा भज्जा नियभत्तुणो मरणकिच्चं किच्चा विआरेइ- 'इमस्स जच्च-तुरंगमस्स विक्कएणं रुप्पयसयं होही, तं तु महायणस्स अप्पणं भविस्सइ । मम पासे किं पि न होस्सइ । तओ एवं कायव्वं जेण सव्वधणं मईयपासे चिय ठाइ'' ।

एवं चिंतिऊण एगो मंजारो पालिओ । विक्कयकाले मंजारस्स रुप्पयाणं नवनवई ठविआ, तुरंगस्स एगं रुप्पयं ठविअं । जो कोवि कयणत्थं आगच्छेज्जा तस्स सा एवं कहेइ- 'मए एए मंजार-तुरंगा सह विक्केयव्वा, एक्कमेक्कं कस्स वि न दायव्वं, जस्स गहणेच्छा सिया, तया मंजारस्स रुप्पगाणं नवनवई दायव्वा, तुरंगमस्स एगं चिय रुप्पयं । एगमेगं तु न विक्केस्सामि' । लोगा तुरंगमस्स गहणेच्छाए आगच्छंति । सा पुव्वं मंजारगहणाय कहेइ, पच्छा तुरंगं । मंजारं को वि न गिण्हेइ । एगया एगो धणिओ आगओ । तीए तारिसं वयणं सोच्चा मंजारस्स नवनवइरुप्पयं दिण्णं, आसस्स रुप्पयं एगं दिण्णं ।

सा रुप्पयसयं गिण्हित्ता घरे आगया । महाजणं बोल्लाविऊण जया एगं रुप्पयं देइ, तया पुच्छइ किमेवं ? सा कहेइ- 'तुरंगमस्स विक्कएण दव्वं रुप्पयं लद्धं,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवनवइरुप्पयं तु मंजारविक्कएण लद्धं । मम भत्तुणा वि एवं कहिअं- ''तुरंगमस्स विक्कएण जं दव्वं होज्जा, तं अप्पियव्वं'', मए उ तं दव्वं तुम्हाणं दिण्णं' । एवं वुड्ढाए महायणो वि वंचिओ । तं च सव्वदव्वं, अइलुद्धत्तणेण उवभोगं अकिच्चा चिय, विविहकिलेसं सहमाणा, मरणकाले वि झायमाणा अट्टरोद्दज्झाणपरा मच्चुं पत्ता । तओ निएण हत्थेण जं दाणं दिण्णं, तं परलोअसुहकरं होइ ॥

उवएसो-

दिट्ठंतं थेर-थेरीए, सोच्चा सब्भावओ सया ।
जहुत्तं जं तह दिज्जा, मायं नेव समायरे ॥

◎





Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकाधिपतित्वतन्त्रीयस्य (*DICTATORSHIP*) कस्यचिद् देशस्य न्यायालये कश्चिद् विद्रोहिणमाश्रित्याऽभियोगः प्रवृत्त आसीत्। विद्रोही स तद्देशस्य सर्वसत्ताधीशस्य कृते धूर्तो-मूढ-इति शब्दप्रयोगं - कृतवानासीत्।

न्यायालये स स्वकीयं विधानं सत्यापयितुं सवितर्कं वादं प्रस्तुतवान् । न्यायाधीशस्तस्य वादं श्रुतवानपि । अपि च, सोदाहरणं कतिपयघटना उल्लिख्य स साधितवानपि यत् तत्रत्यः सत्ताधीशो धूर्तोऽस्ति मूढश्चाऽप्यस्त्येवेति।

अन्ततस्तमपराधिनं निश्चित्य न्यायाधीशो दण्डं श्रावितवान्।

न्यायाधीश उक्तवान् - तवाऽपराधस्तावान् गम्भीरो भयानकश्च यद् दण्डद्वयं तदर्थं निश्चीयते। एकोऽपराधस्तावद् दण्डयोग्य एव, अपरश्च शूलारोपणपात्रम्।

**विद्रोही** (साश्चर्यम्) किन्तु, महाशय! कोऽपराधोऽत्र केवलं दण्डपात्रम्?

**न्यायाधीशः** देशस्य सर्वोच्चपदस्थितव्यक्तेः कृते त्वया धूर्तो मूढश्चेति शब्दौ प्रयुक्तौ।

**विद्रोही** तर्हि शूलारोपणार्हो दण्डः कः?

**न्यायाधीशः** अनेन राष्ट्रस्याऽतिगुप्तं रहस्यं त्वया प्रकटीकृतम्, इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org